

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## सप्तमकाण्डे चतुर्थः प्रश्नः

### सत्रकर्मनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

बृहस्पतिरकामयत। अकामयत श्रत्। श्रन् मे। मे देवाः। देवा दधीरन्न्। दधीरन् गच्छेयम्। गच्छेयम् पुरोधाम्। पुरोधामिति। पुरोधामिति पुरः—धाम्। इति सः। स एतम्। एतम् चतुर्विꣳशतिरात्रम्। चतुर्विꣳशतिरात्रमपश्यत्। चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति—रात्रम्। अपश्यत् तम्। तमा। आऽहरत्। अहरत् तेन। तेनायजत। अयजत ततः। ततो वै। वै तस्मै। तस्मै श्रत्। श्रद् देवाः। देवा अदधत। अदधतागच्छत्। अगच्छत् पुरोधाम्। पुरोधाय्ँये। पुरोधामिति पुरः—धाम्। य एवम्। एवँव्विद्वाꣳसः। विद्वाꣳसश्चतुर्विꣳशतिरात्रम्। चतुर्विꣳशतिरात्रमासते। चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति—रात्रम्। आसते श्रत्। श्रदेभ्यः। एभ्यो मनुष्याः। मनुष्या दधते। दधते गच्छन्ति। गच्छन्ति पुरोधाम्। पुरोधाम् ज्योतिः। पुरोधामिति पुरः—धाम्। ज्योतिर् गौः। गौरायुः। आयुरिति। इति त्र्यहाः। त्र्यहा भवन्ति। त्र्यहा इति त्रि—अहाः। भवन्तीयम्। इयँव्वाव। वाव ज्योतिः। ज्योतिरन्तरिख्षम्। अन्तरिख्षम् गौः। गौरसौ। असावायुः। आयुरिमान्। ॥ [१] ॥ इमानेव। एव लोकान्। लोकानभ्यारोहन्ति। अभ्यारोहन्त्यभिपूर्वम्। अभ्यारोहन्तीत्यभि—आरोहन्ति। अभिपूर्वम् त्र्यहाः। अभिपूर्वमित्यभि—पूर्वम्। त्र्यहा भवन्ति। त्र्यहा इति त्रि—अहाः। भवन्त्यभिपूर्वम्। अभिपूर्वमेव। अभिपूर्वमित्यभि—पूर्वम्। एव सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमभ्यारोहन्ति। अभ्यारोहन्त्यसत्रम्। अभ्यारोहन्तीत्यभि—आरोहन्ति। असत्रव्वै। वा एतत्। एतद् यत्। यदछन्दोमम्।

अछन्दोमय्यँत्। अछन्दोममित्यछन्दः—ममम्। यच् छन्दोमाः। छन्दोमा भवन्ति। छन्दोमा इति छन्दः—माः। भवन्ति तेन। तेन सत्रम्। सत्रम् देवताः। देवता एव। एव पृष्ठैः। पृष्ठैरव। अव रुन्धते। रुन्धते पशून्। पशून् छन्दोमैः। छन्दोमैरोजः। छन्दोमैरिति छन्दः—मैः। ओजो वै। वै वीर्यम्। वीर्यम् पृष्ठानि। पृष्ठानि पशवः। पशवश्छन्दोमाः। छन्दोमा ओजसि। छन्दोमा इति छन्दः—माः। ओजस्येव। एव वीर्ये। वीर्ये पशुषु। पशुषु प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति बृहद्रथन्तराभ्याम्। बृहद्रथन्तराभ्याय्यँन्ति। बृहद्रथन्तराभ्यामिति बृहत्—रथन्तराभ्याम्। यन्तीयम्। इयव्वाँव। वाव रथन्तरम्। रथन्तरमसौ। रथन्तरमिति रथम्—तरम्। असौ बृहत्। बृहदाभ्याम्। आभ्यामेव। एव यन्ति। ॥ [२] ॥ यन्त्यथो। अथो अनयोः। अथो इत्यथो। अनयोरेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्येते। एते वै। एते इत्येते। वै यज्ञस्य। यज्ञस्याञ्जसायनी। अञ्जसायनी स्रुती। अञ्जसायनी इत्यञ्जसा—अयनी। स्रुती ताभ्याम्। स्रुती इति स्रुती। ताभ्यामेव। एव सुवर्गम्। सुवर्गल्लोँकम्। सुवर्गमिति सुवः—गम्। लोकय्यँन्ति। यन्ति चतुर्विꣳशतिरात्रः। चतुर्विꣳशतिरात्रो भवति। चतुर्विꣳशतिरात्र इति चतुर्विꣳशति—रात्रः। भवति चतुर्विꣳशतिः। चतुर्विꣳशतिरर्द्धमासाः। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अर्द्धमासाः सव्वँथ्सरः। अर्द्धमासा इत्यर्द्ध—मासाः। सव्वँथ्सरः सव्वँथ्सरः। सव्वँथ्सर इति सम्—वथ्सरः। सव्वँथ्सरः सुवर्गः। सव्वँथ्सर इति सम्—वथ्सरः। सुवर्गो लोकः। सुवर्ग इति सुवः—गः। लोकः सव्वँथ्सरे। सव्वँथ्सर एव। सव्वँथ्सर इति सम्—वथ्सरे। एव सुवर्गे। सुवर्गे लोके। सुवर्ग इति सुवः—गे। लोके प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यथो। अथो चतुर्विꣳशत्यख्षरा। अथो इत्यथो। चतुर्विꣳशत्यख्षरा गायत्री। चतुर्विꣳशत्यख्षरेति चतुर्विꣳशति—अख्षरा। गायत्री गायत्री। गायत्री ब्रह्मवर्चसम्। ब्रह्मवर्चसम् गायत्रिया। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। गायत्रियैव। एव ब्रह्मवर्चसम्। ब्रह्मवर्चसमव। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। अव रुन्धते। रुन्धतेऽतिरात्रौ। अतिरात्रावभितः। अतिरात्रावित्यति—रात्रौ। अभितो भवतः। भवतो ब्रह्मवर्चसस्य। ब्रह्मवर्चसस्य परिगृहीत्यै। ब्रह्मवर्चसस्येति ब्रह्म—वर्चसस्य। परिगृहित्या इति परि—गृहीत्यै॥ ॥ [३] ॥

(असावायु राभ्यामेव पञ्चचत्वारिꣳशच्च) ॥ १ ॥

यथा वै। वै मनुष्याः। मनुष्या एवम्। एवम् देवाः। देवा अग्रे। अग्र आसन्न्। आसन् ते। तेऽकामयन्त। अकामयन्तावर्तिम्। अवर्तिम् पाप्मानम्। पाप्मानम् मृत्युम्। मृत्युमपहत्य। अपहत्य दैवीम्। अपहत्येत्यप—हत्य। दैवीꣳ सꣳसदम्। सꣳसदम् गच्छेम। सꣳसदमिति सम्—सदम्। गच्छेमेति। इति ते। त एतम्। एतम् चतुर्विꣳशतिरात्रम्। चतुर्विꣳशतिरात्रमपश्यन्न्। चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति—रात्रम्। अपश्यन् तम्। तमा। आऽहरन्न्। अहरन् तेन। तेनायजन्त। अयजन्त ततः। ततो वै। वै ते। तेऽवर्तिम्। अवर्तिम् पाप्मानम्। पाप्मानम् मृत्युम्। मृत्युमपहत्य। अपहत्य दैवीम्। अपहत्येत्यप—हत्य। दैवीꣳ सꣳसदम्। सꣳसदमगच्छन्न्। सꣳसदमिति सम्—सदम्। अगच्छन्ये। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳसश्चतुर्विꣳशतिरात्रम्। चतुर्विꣳशतिरात्रमासते। चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति—रात्रम्। आसतेऽवर्तिम्। अवर्तिमेव। एव पाप्मानम्। पाप्मानमपहत्य। अपहत्य श्रियम्। अपहत्येत्यप—हत्य। श्रियम् गच्छन्ति। गच्छन्ति श्रीः। श्रीर्हि। हि मनुष्यस्य। मनुष्यस्य दैवी। ॥ [४] ॥ दैवी सꣳसत्। सꣳसज् ज्योतिः। सꣳसदिति सम्—सत्। ज्योतिरतिरात्रः। अतिरात्रो भवति। अतिरात्र इत्यति—रात्रः। भवति सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्यानुख्यात्यै। अनुख्यात्यै पृष्ठ्यः। अनुख्यात्या इत्यनु—ख्यात्यै। पृष्ठ्यः षडहः। षडहो भवति। षडह इति षट्—अहः। भवति षट्। षड् वै। वा ऋतवः। ऋतवः सँव्वथ्सरः। सँव्वथ्सरस्तम्। सँव्वथ्सर इति सम्—वथ्सरः। तम् मासाः। मासा अर्द्धमासाः। अर्द्धमासा ऋतवः। अर्द्धमासा इत्यर्द्ध—मासाः। ऋतवः प्रविश्य। प्रविश्य दैवीम्। प्रविश्येति प्र—विश्य। दैवीꣳ सꣳसदम्। सꣳसदमगच्छन्न्। सꣳसदमिति सम्—सदम्। अगच्छन्ये। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳसश्चतुर्विꣳशतिरात्रम्। चतुर्विꣳशतिरात्रमासते। चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति—रात्रम्। आसते सँव्वथ्सरम्। सँव्वथ्सरमेव। सँव्वथ्सरमिति सम्—वथ्सरम्। एव प्रविश्य। प्रविश्य वस्यसीम्। प्रविश्येति प्र—विश्य। वस्यसीꣳ सꣳसदम्। सꣳसदम् गच्छन्ति। सꣳसदमिति सम्—सदम्। गच्छन्ति त्रयः। त्रयस्त्रयस्त्रिꣳशाः। त्रयस्त्रिꣳशा अवस्तात्। त्रयस्त्रिꣳशा इति त्रयः—त्रिꣳशाः। अवस्ताद् भवन्ति।

भवन्ति त्रयः। त्रयस्त्रयस्त्रिꣳशाः। त्रयस्त्रिꣳशाः परस्तात्। त्रयस्त्रिꣳशा इति त्रयः—त्रिꣳशाः। परस्तात् त्रयस्त्रिꣳशैः। त्रयस्त्रिꣳशैरेव। त्रयस्त्रिꣳशैरिति त्रयः—त्रिꣳशैः। एवोभयतः। उभय-तोऽर्वतिम्। अर्वतिम् पाप्मानम्। पाप्मानमपहत्य। अपहत्य दैवीम्। अपहत्येत्यप—हत्य। दैवीꣳ सꣳसदम्। सꣳसदम् मद्ध्यतः। सꣳसदमिति सम्—सदम्। मद्ध्यतो गच्छन्ति।
॥ [५] ॥ गच्छन्ति पृष्ठानि। पृष्ठानि हि। हि दैवी। दैवी सꣳसत्। सꣳसज् जामि। सꣳसदिति सम्—सत्। जामि वै। वा एतत्। एतत् कुर्वन्ति। कुर्वन्ति यत्। यत् त्रयः। त्रयस्त्रयस्त्रिꣳशाः। त्रयस्त्रिꣳशा अन्वञ्चः। त्रयस्त्रिꣳशा इति त्रयः—त्रिꣳशाः। अन्वञ्चो मद्ध्ये। मद्ध्येऽनिरुक्तः। अनिरुक्तो भवति। अनिरुक्त इत्यनिः—उक्तः। भवति तेन। तेनाजामि। अजाम्यूद्ध्वानि। ऊद्ध्वानि पृष्ठानि। पृष्ठानि भवन्ति। भवन्त्यूद्ध्वाः। ऊद्ध्वाश्छन्दोमाः। छन्दोमा उभाभ्याम्। छन्दोमा इति छन्दः—माः। उभाभ्याꣳ रूपाभ्याम्। रूपाभ्याꣳ सुवर्गम्। सुवर्गँल्लोकम्। सुवर्ग-मिति सुवः—गम्। लोकय्ँयन्ति। यन्त्यसत्रम्। असत्रव्वै। वा एतत्। एतद् यत्। यदछन्दोमम्। अछन्दोमय्ँयत्। अछन्दोममित्यछन्दः—मम्। यच् छन्दोमाः। छन्दोमा भवन्ति। छन्दोमा इति छन्दः—माः। भवन्ति तेन। तेन सत्रम्। सत्रम् देवताः। देवता एव। एव पृष्ठैः। पृष्ठैरव। अव रुन्धते। रुन्धते पशून्। पशूञ्छन्दोमैः। छन्दोमैरोजः। छन्दोमैरिति छन्दः—मैः। ओजो वै। वै वीर्यम्। वीर्यम् पृष्ठानि। पृष्ठानि पशवः। पशवश्छन्दोमाः।
॥ [६] ॥ छन्दोमा ओजसि। छन्दोमा इति छन्दः—माः। ओजस्येव। एव वीर्ये। वीर्ये पशुषु। पशुषु प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति त्रयः। त्रयस्त्रयस्त्रिꣳशाः। त्रयस्त्रिꣳशा अवस्तात्। त्रयस्त्रिꣳशा इति त्रयः—त्रिꣳशाः। अवस्ताद् भवन्ति। भवन्ति त्रयः। त्रयस्त्रयस्त्रिꣳशाः। त्रयस्त्रिꣳशाः परस्तात्। त्रयस्त्रिꣳशा इति त्रयः—त्रिꣳशाः। परस्तान् मद्ध्ये। मद्ध्ये पृष्ठानि। पृष्ठान्युरः। उरो वै। वै त्रयस्त्रिꣳशाः। त्रय-स्त्रिꣳशा आत्मा। त्रयस्त्रिꣳशा इति त्रयः—त्रिꣳशाः। आत्मा पृष्ठानि। पृष्ठान्यात्मने। आत्मन एव। एव तत्। तद् यजमानाः। यजमानाः शर्म। शर्म नह्यन्ते। नह्यन्तेऽनार्त्यै। अनार्त्यै बृहद्रथन्तराभ्याम्। बृहद्रथन्तराभ्याय्ँयन्ति। बृहद्रथन्तराभ्यामिति बृहत्—रथन्तराभ्याम्। यन्तीयम्। इयव्वाँव। वाव रथन्तरम्। रथन्तरमसौ। रथन्तरमिति रथम्—तरम्। असौ बृहत्। बृहदाभ्याम्। आभ्यामेव। एव यन्ति। यन्त्यथो। अथो अनयोः। अथो इत्यथो। अनयोरेव।

एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्येते। एते वै। एते इत्येते। वै यज्ञस्य। यज्ञस्याञ्जसायनी। अञ्जसायनी स्रुती। अञ्जसायनी इत्यञ्जसा—अयनी। स्रुती ताभ्याम्। स्रुती इति स्रुती। ताभ्या-मेव। एव सुवर्गम्। ॥ [७] ॥ सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकँय्यन्ति। यन्ति पराञ्चः। पराञ्चो वै। वा एते। एते सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम-भ्यारोहन्ति। अभ्यारोहन्ति ये। अभ्यारोहन्तीत्यभि—आरोहन्ति। ये पराचीनानि। पराचीनानि पृष्ठानि। पृष्ठान्युपयन्ति। उपयन्ति प्रत्यङ्ङ्। उपयन्तीत्युप—यन्ति। प्रत्यङ् ख्षडहः। षडहो भवति। षडह इति षट्—अहः। भवति प्रत्यवरूढ्यै। प्रत्यवरूढ्या अथो। प्रत्यवरूढ्या इति प्रति—अवरूढ्यै। अथो प्रतिष्ठित्यै। अथो इत्यथो। प्रतिष्ठित्या उभयोः। प्रतिष्ठित्या इति प्रति—स्थित्यै। उभयोर् लोकयोः। लोकयोर्ऋद्ध्वा। ऋद्ध्वोत्। उत् तिष्ठन्ति। तिष्ठन्ति त्रिवृतः। त्रिवृतोऽधि। त्रिवृत इति त्रि—वृतः। अधि त्रिवृतम्। त्रिवृतमुप। त्रिवृतमिति त्रि—वृतम्। उप यन्ति। यन्ति स्तोमानाम्। स्तोमानाꣳ सम्पत्यै। सम्पत्यै प्रभवाय। सम्पत्या इति सम्—पत्यै। प्रभवाय ज्योतिः। प्रभवायेति प्र—भवाय। ज्योतिरग्निष्टोमः। अग्निष्टोमो भवति। अग्निष्टोम इत्यग्नि—स्तोमः। भवत्ययम्। अयँव्वाव। वाव सः। स ख्षयः। ख्षयोऽस्मात्। अस्मादेव। एव तेन। तेन ख्षयात्। ख्षयान् न। न यन्ति। यन्ति चतुर्विꣳशतिरात्रः। चतुर्विꣳशतिरात्रो भवति। चतुर्विꣳशतिरात्र इति चतुर्विꣳशति—रात्रः। भवति चतुर्विꣳशतिः। चतुर्विꣳशतिरर्द्ध-मासाः। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अर्द्धमासाः सँव्वथ्सरः। अर्द्धमासा इत्यर्द्ध—मासाः। सँव्वथ्सरः सँव्वथ्सरः। सँव्वथ्सर इति सम्—वथ्सरः। सँव्वथ्सरः सुवर्गः। सँव्वथ्सर इति सम्—वथ्सरः। सुवर्गो लोकः। सुवर्ग इति सुवः—गः। लोकः सँव्वथ्सरे। सँव्वथ्सर एव। सँव्वथ्सर इति सम्—वथ्सरे। एव सुवर्गे। सुवर्गे लोके। सुवर्ग इति सुवः—गे। लोके प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यथो। अथो चतुर्विꣳशत्यख्षरा। अथो इत्यथो। चतुर्विꣳशत्यख्षरा गायत्री। चतुर्विꣳशत्यख्षरेति चतुर्विꣳशति—अख्षरा। गायत्री गायत्री। गायत्री ब्रह्मवर्चसम्। ब्रह्म-वर्चसम् गायत्रिया। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। गायत्रियैव। एव ब्रह्मवर्चसम्। ब्रह्मव-र्चसमव। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। अव रुन्धते। रुन्धतेऽतिरात्रौ। अतिरात्रावभितः।

अ॒ति॒रा॒त्रावि॒त्य॑ति—रा॒त्रौ। अ॒भितो॑ भवतः। भ॒व॒तो ब्र॒ह्म॒व॒र्च॒स॒स्य॑। ब्र॒ह्म॒व॒र्च॒स॒स्य॒ परि॑गृहीत्यै।
ब्र॒ह्म॒व॒र्च॒स॒स्येति॑ ब्रह्म—व॒र्च॒स॒स्य॑। परि॑गृहीत्या॒ इति॒ परि॑—गृ॒ही॒त्यै॥ ॥ [८] ॥

(म॒नु॒ष्य॑स्य मध्य॒तः प॒श॒व॒ स्ताभ्या॑मे॒व सँ॑वथ्स॒र श्च॒तुर्वि॑ꣳशतिश्च) ॥ २ ॥

ऋ॒ख्षा वै। वा इ॒यम्। इ॒यम॑लो॒मका᳚। अ॒लो॒मका॑ऽऽसीत्। आ॒सी॒थ् सा। साऽका॑मयत।
अ॒का॒म॒य॒तौष॑धीभिः। ओष॑धीभि॒र् व॒न॒स्पति॑भिः। ओष॑धीभि॒रित्योष॑धि—भिः। व॒न॒स्पति॑भिः प्र।
व॒न॒स्पति॑भि॒रिति॒ व॒न॒स्पति॑—भिः। प्र जा॑येय। जा॒ये॒येति॑। इति॑ सा। सैताः। ए॒तास्त्रि॒ꣳ॒शत᳚म्।
त्रि॒ꣳ॒शत॒ꣳ॒ रात्रीः᳚। रात्री॑रपश्यत्। अ॒प॒श्य॒त् तत॑ः। ततो॒ वै। वा इ॒यम्। इ॒यमोष॑धीभिः। ओष॑-
धीभि॒र् व॒न॒स्पति॑भिः। ओष॑धीभि॒रित्योष॑धि—भिः। व॒न॒स्पति॑भिः प्र। व॒न॒स्पति॑भि॒रिति॒ व॒न॒-
स्पति॑—भिः। प्राजा॑यत। अ॒जा॒य॒त ये। ये प्र॒जाका॑माः। प्र॒जाका॑माः प॒शुका॑माः। प्र॒जाका॑मा
इति॑ प्र॒जा—का॒माः। प॒शुका॑माः स्युः। प॒शुका॑मा॒ इति॑ प॒शु—का॒माः। स्युस्ते। त ए॒ताः।
ए॒ता आसी॑रन्न्। आ॒सी॒र॒न् प्र। प्रैव। ए॒व जा॑यन्ते। जा॒य॒न्ते॒ प्र॒जया᳚। प्र॒जया॑ प॒शुभिः॑। प्र॒ज-
येति॑ प्र—जया᳚। प॒शुभि॑रि॒यम्। प॒शुभि॑रिति॑ प॒शु—भिः। इ॒यव्वै॒। वा अ॑ख्षुद्ध्यत्। अ॒ख्षु॒द्ध्य॒थ्
सा। सैताम्। ए॒ताव्विँ॒राज᳚म्। वि॒राज॑मपश्यत्। वि॒राज॒मिति॑ वि—राज᳚म्। अ॒प॒श्य॒त् ताम्।
तामा॒त्मन्न्। आ॒त्मन् धि॑त्वा। धि॒त्वाऽन्ना॒द्य᳚म्। अ॒न्ना॒द्यमव॑। अ॒न्ना॒द्यमित्य॑न्न—अद्य᳚म्। अवा॑-
रुन्ध। अ॒रु॒न्धौष॑धीः। ओष॑धी॒र् व॒न॒स्पती॑न्। ॥ [९] ॥ व॒न॒स्पती॑न् प्र॒जाम्। प्र॒जाम् प॒शून्।
प्र॒जामिति॑ प्र—जाम्। प॒शून् तेन॑। तेना॑वर्द्धत। अ॒व॒र्द्ध॒त सा। सा जे॒मान᳚म्। जे॒मान॑म् महि॒-
मान᳚म्। म॒हि॒मान॑मगच्छत्। अ॒ग॒च्छ॒द् ये। य ए॒वम्। ए॒वव्विँ॒द्वाꣳसः॑। वि॒द्वाꣳस॑ ए॒ताः। ए॒ता
आस॑ते। आस॑ते वि॒राज᳚म्। वि॒राज॑मे॒व। वि॒राज॒मिति॑ वि—राज᳚म्। ए॒वात्मन्न्। आ॒त्मन् धि॑त्वा।
धि॒त्वाऽन्ना॒द्य᳚म्। अ॒न्ना॒द्यमव॑। अ॒न्ना॒द्यमित्य॑न्न—अद्य᳚म्। अव॑ रुन्धते। रु॒न्ध॒ते व॒र्द्धन्ते। व॒र्द्धन्ते
प्र॒जया᳚। प्र॒जया॑ प॒शुभिः॑। प्र॒जयेति॑ प्र—जया᳚। प॒शुभि॑र् जे॒मान᳚म्। प॒शुभि॒रिति॑ प॒शु—भिः।
जे॒मान॑म् म॒हि॒मान᳚म्। म॒हि॒मान॑म् गच्छन्ति। ग॒च्छ॒न्ति॒ ज्योति॑ः। ज्योति॑रतिरा॒त्रः। अ॒ति॒रा॒त्रो
भ॑वति। अ॒ति॒रा॒त्र इत्य॑ति—रा॒त्रः। भ॒व॒ति॒ सु॒व॒र्गस्य॑। सु॒व॒र्गस्य॑ लो॒कस्य॑। सु॒व॒र्गस्येति॑ सुवः—
गस्य॑। लो॒कस्यानु॑ख्यात्यै। अनु॑ख्यात्यै पृष्ठ्यः॑। अनु॑ख्यात्या इत्यनु—ख्यात्यै। पृष्ठ्यः॑ षडहः।

षडहो भवति। षडह इति षट्—अहः। भवति षट्। षड् वै। वा ऋतवः। ऋतवः षट्। षट् पृष्ठानि। पृष्ठानि पृष्ठैः। पृष्ठैरेव। एवर्तून्। ऋतूनन्वारोहन्ति। अन्वारोहन्त्यृतुभिः। अन्वारोहन्तीत्यनु—आरोहन्ति। ऋतुभिः सँव्वथ्सरम्। ऋतुभिरित्यृतु—भिः। सँव्वथ्सरम् ते। सँव्वथ्सरमिति सम्—वथ्सरम्। ते सँव्वथ्सरे। सँव्वथ्सर एव। सँव्वथ्सर इति सम्—वथ्सरे। एव प्रति। ॥ [१०] ॥ प्रति तिष्ठन्ति। तिष्ठन्ति त्रयस्त्रिꣳशात्। त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशम्। त्रयस्त्रिꣳशादिति त्रयः—त्रिꣳशात्। त्रयस्त्रिꣳशमुप। त्रयस्त्रिꣳशमिति त्रयः—त्रिꣳशम्। उप यन्ति। यन्ति यज्ञस्य। यज्ञस्य सन्तत्यै। सन्तत्या अथो। सन्तत्या इति सम्—तत्यै। अथो प्रजापतिः। अथो इत्यथो। प्रजापतिर् वै। प्रजापतिरिति प्रजा—पतिः। वै त्रयस्त्रिꣳशः। त्रयस्त्रिꣳशः प्रजापतिम्। त्रयस्त्रिꣳश इति त्रयः—त्रिꣳशः। प्रजापतिमेव। प्रजापतिमिति प्रजा—पतिम्। एवा। आ रभन्ते। रभन्ते प्रतिष्ठित्यै। प्रतिष्ठित्यै त्रिणवः। प्रतिष्ठित्या इति प्रति—स्थित्यै। त्रिणवो भवति। त्रिणव इति त्रि—नवः। भवति विजित्यै। विजित्या एकविꣳशः। विजित्या इति वि—जित्यै। एकविꣳशो भवति। एकविꣳश इत्येक—विꣳशः। भवति प्रतिष्ठित्यै। प्रतिष्ठित्या अथो। प्रतिष्ठित्या इति प्रति—स्थित्यै। अथो रुचम्। अथो इत्यथो। रुचमेव। एवात्मन्न्। आत्मन् दधते। दधते त्रिवृत्। त्रिवृदग्निष्टुत्। त्रिवृदिति त्रि—वृत्। अग्निष्टुद् भवति। अग्निष्टुदित्यग्नि—स्तुत्। भवति पाप्मानम्। पाप्मानमेव। एव तेन। तेन निः। निर् दहन्ते। दहन्तेऽथो। अथो तेजः। अथो इत्यथो। तेजो वै। वै त्रिवृत्। त्रिवृत् तेजः। त्रिवृदिति त्रि—वृत्। तेज एव। एवात्मन्न्। आत्मन् दधते। दधते पञ्चदशः। पञ्चदश इन्द्रस्तोमः। पञ्चदश इति पञ्च—दशः। इन्द्रस्तोमो भवति। इन्द्रस्तोम इतीन्द्र—स्तोमः। भवतीन्द्रियम्। इन्द्रियमेव। एवाव। अव रुन्धते। ॥ [११] ॥ रुन्धते सप्तदशः। सप्तदशो भवति। सप्तदश इति सप्त—दशः। भवत्यन्नाद्यस्य। अन्नाद्यस्यावरुद्ध्यै। अन्नाद्यस्येत्यन्न—अद्यस्य। अवरुद्ध्या अथो। अवरुद्ध्या इत्यव—रुद्ध्यै। अथो प्र। अथो इत्यथो। प्रैव। एव तेन। तेन जायन्ते। जायन्त एकविꣳशः। एकविꣳशो भवति। एकविꣳश इत्येक—विꣳशः। भवति प्रतिष्ठित्यै। प्रतिष्ठित्या अथो। प्रतिष्ठित्या इति प्रति—स्थित्यै। अथो रुचम्। अथो इत्यथो। रुचमेव। एवात्मन्न्। आत्मन् दधते। दधते चतुर्विꣳशः। चतुर्विꣳशो भवति। चतुर्विꣳश इति चतुः—विꣳशः। भवति चतुर्विꣳ-

शतिः। चतुर्विꣳशतिरर्द्धमासाः। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अर्द्धमासाः सँव्व्थ्सरः। अर्द्धमासा इत्यर्द्ध—मासाः। सँव्व्थ्सरः सँव्व्थ्सरः। सँव्व्थ्सर इति सम्—वथ्सरः। सँव्व्थ्सरः सुवर्गः। सँव्व्थ्सर इति सम्—वथ्सरः। सुवर्गो लोकः। सुवर्ग इति सुवः—गः। लोकः सँव्व्थ्सरे। सँव्व्थ्सर एव। सँव्व्थ्सर इति सम्—वथ्सरे। एव सुवर्गे। सुवर्गे लोके। सुवर्ग इति सुवः—गे। लोके प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यथो। अथो एषः। अथो इत्यथो। एष वै। वै विषूवान्। विषूवान्विषूवन्तः। विषूवानिति विषु—वान्। विषूवन्तो भवन्ति। विषूवन्त इति विषु—वन्तः। भवन्ति ये। य एवम्। एवंविद्वाꣳसः। विद्वाꣳस एताः। एता आसते। आसते चतुर्विꣳशात्। चतुर्विꣳशात् पृष्ठानि। चतुर्विꣳशादिति चतुः—विꣳशात्। पृष्ठान्युप। उप यन्ति। यन्ति सँव्व्थ्सरे। सँव्व्थ्सर एव। सँव्व्थ्सर इति सम्—वथ्सरे। एव प्रतिष्ठाय। प्रतिष्ठाय देवताः। प्रतिष्ठायेति प्रति—स्थाय। ॥ [१२] ॥ देवता अभ्यारोहन्ति। अभ्यारोहन्ति त्रयस्त्रिꣳशात्। अभ्यारोहन्तीत्यभि—आरोहन्ति। त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशम्। त्रयस्त्रिꣳशादिति त्रयः—त्रिꣳशात्। त्रयस्त्रिꣳशमुप। त्रयस्त्रिꣳशमिति त्रयः—त्रिꣳशम्। उप यन्ति। यन्ति त्रयस्त्रिꣳशात्। त्रयस्त्रिꣳशद् वै। त्रयस्त्रिꣳशदिति त्रयः—त्रिꣳशत्। वै देवताः। देवता देवतासु। देवतास्वेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति त्रिणवः। त्रिणवो भवति। त्रिणव इति त्रि—नवः। भवतीमे। इमे वै। वै लोकाः। लोकास्त्रिणवः। त्रिणव एषु। त्रिणव इति त्रि—नवः। एष्वेव। एव लोकेषु। लोकेषु प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति द्वौ। द्वावेकविꣳशौ। एकविꣳशौ भवतः। एकविꣳशावित्येक—विꣳशौ। भवतः प्रतिष्ठित्यै। प्रतिष्ठित्या अथो। प्रतिष्ठित्या इति प्रति—स्थित्यै। अथो रुचम्। अथो इत्यथो। रुचमेव। एवात्मन्न्। आत्मन् दधते। दधते बहवः। बहवः षोडशिनः। षोडशिनो भवन्ति। भवन्ति तस्मात्। तस्माद् बहवः। बहवः प्रजासु। प्रजासु वृषाणः। प्रजास्विति प्र—जासु। वृषाणो यत्। यदेते। एते स्तोमाः। स्तोमा व्यतिषक्ताः। व्यतिषक्ता भवन्ति। व्यतिषक्ता इति वि—अतिषक्ताः। भवन्ति तस्मात्। तस्मादियम्। इयमोषधीभिः। ओषधीभिर् वनस्पतिभिः। ओषधीभिरित्योषधि—भिः। वनस्पतिभिर् व्यतिषक्ता। वनस्पतिभिरिति वनस्पति—भिः। व्यतिषक्ता व्यतिषज्यन्ते। व्यतिषक्तेति वि—अतिषक्ता। ॥ [१३] ॥ व्यतिषज्यन्ते प्रजया। व्यतिषज्यन्त इति वि—अतिषज्यन्ते। प्रजया पशुभिः। प्रजयेति प्र—

जया। पशुभिर् ये। पशुभिरिति पशु—भिः। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳस एताः। एता आसते। आसतेऽक्लृप्ताः। अक्लृप्ता वै। वा एते। एते सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकय्यँन्ति। यन्त्युच्चावचान्। उच्चावचान्हि। हि स्तोमान्। स्तोमानुपयन्ति। उपयन्ति यत्। उपयन्तीत्युप—यन्ति। यदेते। एत ऊर्ध्वाः। ऊर्ध्वाः क्लृप्ताः। क्लृप्ताः स्तोमाः। स्तोमा भवन्ति। भवन्ति क्लृप्ताः। क्लृप्ता एव। एव सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकय्यँन्ति। यन्त्युभयोः। उभयोरेभ्यः। एभ्यो लोकयोः। लोकयोः कल्पते। कल्पते त्रिꣳशत्। त्रिꣳशदेताः। एतास्त्रिꣳशदक्षरा। त्रिꣳशदक्षरा विराट्। त्रिꣳशदक्षरेति त्रिꣳशत्—अक्षरा। विराडन्नम्। विराडिति वि—राट्। अन्नव्विँराट्। विराड् विराजा। विराडिति वि—राट्। विराजैव। विराजेति वि—राजा। एवान्नाद्यम्। अन्नाद्यमव। अन्नाद्यमित्यन्न—अद्यम्। अव रुन्धते। रुन्धतेऽतिरात्रौ। अतिरात्राविभितः। अतिरात्रावित्यति—रात्रौ। अभितो भवतः। भवतोऽन्नाद्यस्य। अन्नाद्यस्य परिगृहीत्यै। अन्नाद्यस्येत्यन्न—अद्यस्य। परिगृहीत्या इति परि—गृहीत्यै॥

॥ [१४] ॥

(ओषधीः सव्वँथ्सर एवा ऽव प्रतिष्ठाय व्यतिषक्त्यै कान्न पञ्चाशच्च) ॥ ३ ॥

प्रजापतिः सुवर्गम्। प्रजापतिरिति प्रजा—पतिः। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमैत्। ऐत् तम्। तम् देवाः। देवा येनयेन। येनयेन छन्दसा। येनयेनेति येन—येन। छन्दसाऽनु। अनु प्र। प्रायुञ्जत। अयुञ्जत तेन। तेन न। नाप्नुवन्न्। आप्नुवन् ते। त एताः। एता द्वात्रिꣳशतम्। द्वात्रिꣳशतꣳ रात्रीः। रात्रीरपश्यन्न्। अपश्यन् द्वात्रिꣳशदक्षरा। द्वात्रिꣳशदक्षराऽनुष्टुक्। द्वात्रिꣳशदक्षरेति द्वात्रिꣳशत्—अक्षरा। अनुष्टुगानुष्टुभः। अनुष्टुगित्यनु—स्तुक्। आनुष्टुभः प्रजापतिः। आनुष्टुभ इत्यानु—स्तुभः। प्रजापतिः स्वेन। प्रजापतिरिति प्रजा—पतिः। स्वेनैव। एव छन्दसा। छन्दसा प्रजापतिम्। प्रजापतिमाप्त्वा। प्रजापतिमिति प्रजा—पतिम्। आप्त्वाऽभ्यारुह्य। अभ्यारुह्य सुवर्गम्। अभ्यारुह्येत्यभि—आरुह्य। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्ये। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳस एताः। एता आसते। आसते द्वात्रिꣳशत्। द्वात्रिꣳशदेताः। एता द्वात्रिꣳशदक्षरा। द्वात्रिꣳशदक्षराऽनुष्टुक्। द्वात्रिꣳ-

शदख्षरेति द्वात्रिꣳशत्—अख्षरा। अनुष्टुगानुष्टुभः। अनुष्टुगित्यनु—स्तुक्। आनुष्टुभः प्रजा-
पतिः। आनुष्टुभ इत्यानु—स्तुभः। प्रजापतिः स्वेन। प्रजापतिरिति प्रजा—पतिः। स्वेनैव।
एव छन्दसा। छन्दसा प्रजापतिम्। प्रजापतिमाप्त्वा। प्रजापतिमिति प्रजा—पतिम्। आप्त्वा
श्रियम्। श्रियम् गच्छन्ति। गच्छन्ति श्रीः। ॥ [१५] ॥ श्रीर्हि। हि मनुष्यस्य। मनुष्यस्य
सुवर्गः। सुवर्गो लोकः। सुवर्ग इति सुवः—गः। लोको द्वात्रिꣳशत्। द्वात्रिꣳशदेताः। एता
द्वात्रिꣳशदख्षरा। द्वात्रिꣳशदख्षराऽनुष्टुक्। द्वात्रिꣳशदख्षरेति द्वात्रिꣳशत्—अख्षरा। अनुष्टुग्
वाक्। अनुष्टुगित्यनु—स्तुक्। वागनुष्टुप्। अनुष्टुफ् सर्वाम्। अनुष्टुबित्यनु—स्तुप्। सर्वामेव। एव
वाचम्। वाचमाप्नुवन्ति। आप्नुवन्ति सर्वे। सर्वे वाचः। वाचो वदितारः। वदितारो भवन्ति।
भवन्ति सर्वे। सर्वे हि। हि श्रियम्। श्रियम् गच्छन्ति। गच्छन्ति ज्योतिः। ज्योतिर् गौः।
गौरायुः। आयुरिति। इति त्र्यहाः। त्र्यहा भवन्ति। त्र्यहा इति त्रि—अहाः। भवन्तीयम्। इय-
ँव्वाव। वाव ज्योतिः। ज्योतिरन्तरिख्षम्। अन्तरिख्षम् गौः। गौरसौ। असावायुः। आयु-
रिमान्। इमानेव। एव लोकान्। लोकानभ्यारोहन्ति। अभ्यारोहन्त्यभिपूर्वम्। अभ्यारोहन्ती-
त्यभि—आरोहन्ति। अभिपूर्वम् त्र्यहाः। अभिपूर्वमित्यभि—पूर्वम्। त्र्यहा भवन्ति। त्र्यहा इति
त्रि—अहाः। भवन्त्यभिपूर्वम्। अभिपूर्वमेव। अभिपूर्वमित्यभि—पूर्वम्। एव सुवर्गम्। सुव-
र्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमभ्यारोहन्ति। अभ्यारोहन्ति बृहद्रथन्तराभ्याम्।
अभ्यारोहन्तीत्यभि—आरोहन्ति। बृहद्रथन्तराभ्याँय्यँन्ति। बृहद्रथन्तराभ्यामिति बृहत्—
रथन्तराभ्याम्। यन्तीयम्। ॥ [१६] ॥ इयँव्वाव। वाव रथन्तरम्। रथन्तरमसौ। रथन्त-
रमिति रथम्—तरम्। असौ बृहत्। बृहदाभ्याम्। आभ्यामेव। एव यन्ति। यन्त्यथो। अथो
अनयोः। अथो इत्यथो। अनयोरेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्येते। एते वै। एते
इत्येते। वै यज्ञस्य। यज्ञस्याञ्जसायनी। अञ्जसायनी स्रुती। अञ्जसायनी इत्यञ्जसा—अयनी।
स्रुती ताभ्याम्। स्रुती इति स्रुती। ताभ्यामेव। एव सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—
गम्। लोकँय्यँन्ति। यन्ति पराञ्चः। पराञ्चो वै। वा एते। एते सुवर्गम्। सुवर्गँल्लोकम्। सुवर्ग-
मिति सुवः—गम्। लोकमभ्यारोहन्ति। अभ्यारोहन्ति ये। अभ्यारोहन्तीत्यभि—आरोहन्ति। ये
पराचः। पराचः त्र्यहान्। त्र्यहानुपयन्ति। त्र्यहानिति त्रि—अहान्। उपयन्ति प्रत्यङ्ङ्। उप-

यन्तीत्युप—यन्ति। प्रत्यङ् त्र्यहः। त्र्यहो भवति। त्र्यह इति त्रि—अहः। भवति प्रत्यवरूढ्यै। प्रत्यवरूढ्या अथो। प्रत्यवरूढ्या इति प्रति—अवरूढ्यै। अथो प्रतिष्ठित्यै। अथो इत्यथो। प्रतिष्ठित्या उभयोः। प्रतिष्ठित्या इति प्रति—स्थित्यै। उभयोर् लोकयोः। लोकयोर्ऋद्ध्वा। ऋद्ध्वोत्। उत् तिष्ठन्ति। तिष्ठन्ति द्वात्रिꣳशत्। द्वात्रिꣳशदेताः। एतास्तासाम्। तासाँय्याः। यास्त्रिꣳशत्। त्रिꣳशत् त्रिꣳशदक्षरा। त्रिꣳशदक्षरा विराट्। त्रिꣳशदक्षरेति त्रिꣳशत्—अक्षरा। विराडन्नम्। विराडिति वि—राट्। अन्नँव्विराट्। विराड् विराजा। विराडिति वि—राट्। विराजैव। विराजेति वि—राजा। एवाऽन्नाद्यम्। अन्नाद्यमव। अन्नाद्यमित्यन्न—अद्यम्। अव रुन्धते। रुन्धते ये। ये द्वे। ये इति ये। द्वे अहोरात्रे। द्वे इति द्वे। अहोरात्रे एव। अहोरात्रे इत्यहः—रात्रे। एव ते। ते उभाभ्याम्। ते इति ते। उभाभ्याꣳ रूपाभ्याम्। रूपाभ्याꣳ सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकँय्यन्ति। यन्त्यतिरात्रौ। अतिरात्राविभितः। अतिरात्रावित्यति—रात्रौ। अभितो भवतः। भवतः परिगृहीत्यै। परिगृहीत्या इति परि—गृहीत्यै॥ ॥ [१७] ॥

(गच्छन्ति यन्ति त्रिꣳशदक्षरा द्वाविꣳशतिश्च) ॥ ४ ॥

---

द्वे वाव। द्वे इति द्वे। वाव देवसत्रे। देवसत्रे द्वादशाहः। देवसत्रे इति देव—सत्रे। द्वादशाहश्च। द्वादशाह इति द्वादश—अहः। चैव। एव त्रयस्त्रिꣳशदहः। त्रयस्त्रिꣳशदहश्च। त्रयस्त्रिꣳशदह इति त्रयस्त्रिꣳशत्—अहः। च ये। य एवम्। एवँव्विद्वाꣳसः। विद्वाꣳसस्त्रयस्त्रिꣳशदहम्। त्रयस्त्रिꣳशदहमासते। त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्—अहम्। आसते साक्षात्। साक्षादेव। साक्षादिति स—अक्षात्। एव देवताः। देवता अभ्यारोहन्ति। अभ्यारोहन्ति यथा। अभ्यारोहन्तीत्यभि—आरोहन्ति। यथा खलु। खलु वै। वै श्रेयान्। श्रेयानभ्यारूढः। अभ्यारूढः कामयते। अभ्यारूढ इत्यभि—आरूढः। कामयते तथा। तथा करोति। करोति यदि। यद्यवविद्ध्यति। अवविद्ध्यति पापीयान्। अवविद्ध्यतीत्यव—विद्ध्यति। पापीयान् भवति। भवति यदि। यदि न। नावविद्ध्यति। अवविद्ध्यति सदृङ्ङ्। अवविद्ध्यतीत्यव—विद्ध्यति। सदृङ् ये। सदृङ्ङिति स—दृङ्। य एवम्। एवँव्विद्वाꣳसः। विद्वाꣳसस्त्रयस्त्रिꣳशदहम्। त्रयस्त्रिꣳशदह-

मासते। त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्—अहम्। आसते वि। वि पाप्मना। पाप्मना भ्रातृ-व्येण। भ्रातृव्येणा। आ वर्तन्ते। वर्तन्तेऽहर्भाजः। अहर्भाजो वै। अहर्भाज इत्यहः—भाजः। वा एताः। एता देवाः। देवा अग्रे। अग्र आ। आऽहरन्न्। अहरन्नहः। ॥ [१८] ॥ अहरेकः। एकोऽभजत। अभजताहः। अहरेकः। एकस्ताभिः। ताभिर् वै। वै ते। ते प्रबाहुक्। प्रबाहु-गादृध्नुवन्न्। प्रबाहुगिति प्र—बाहुक्। आदृध्नुवन्ये। य एवम्। एवंविद्वाꣳसः। विद्वाꣳसस्त्रय-स्त्रिꣳशदहम्। त्रयस्त्रिꣳशदहमासते। त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्—अहम्। आसते सर्वे। सर्व एव। एव प्रबाहुक्। प्रबाहुगृद्ध्नुवन्ति। प्रबाहुगिति प्र—बाहुक्। ऋद्ध्नुवन्ति सर्वे। सर्वे ग्राम-णीयम्। ग्रामणीयम् प्र। ग्रामणीयमिति ग्राम—नीयम्। प्राप्नुवन्ति। आप्नुवन्ति पञ्चाहाः। पञ्चाहा भवन्ति। पञ्चाहा इति पञ्च—अहाः। भवन्ति पञ्च। पञ्च वै। वा ऋतवः। ऋतवः सँव्वथ्सरः। सँव्वथ्सर ऋतुषु। सँव्वथ्सर इति सम्—वथ्सरः। ऋतुष्वेव। एव सँव्वथ्सरे। सँव्वथ्सरे प्रति। सँव्वथ्सर इति सम्—वथ्सरे। प्रति तिष्ठन्ति। तिष्ठन्त्यथो। अथो पञ्चाक्षरा। अथो इत्यथो। पञ्चाक्षरा पङ्क्तिः। पञ्चाक्षरेति पञ्च—अक्षरा। पङ्क्तिः पाङ्क्तः। पाङ्क्तो यज्ञः। यज्ञो यज्ञम्। यज्ञमेव। एवाव। अव रुन्धते। रुन्धते त्रीणि। त्रीण्याश्विनानि। आश्विनानि भवन्ति। भवन्ति त्रयः। त्रय इमे। इमे लोकाः। लोका एषु। एष्वेव। ॥ [१९] ॥ एव लोकेषु। लोकेषु प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यथो। अथो त्रीणि। अथो इत्यथो। त्रीणि वै। वै यज्ञस्य। यज्ञ-स्येन्द्रियाणि। इन्द्रियाणि तानि। तान्येव। एवाव। अव रुन्धते। रुन्धते विश्वजित्। विश्वजिद् भवति। विश्वजिदिति विश्व—जित्। भवत्यन्नाद्यस्य। अन्नाद्यस्यावरुद्ध्यै। अन्नाद्यस्येत्यन्न—अद्यस्य। अवरुद्ध्यै सर्वपृष्ठः। अवरुद्ध्या इत्यव—रुद्ध्यै। सर्वपृष्ठो भवति। सर्वपृष्ठ इति सर्व—पृष्ठः। भवति सर्वस्य। सर्वस्याभिजित्यै। अभिजित्यै वाक्। अभिजित्या इत्यभि—जित्यै। वाग् वै। वै द्वादशाहः। द्वादशाहो यत्। द्वादशाह इति द्वादश—अहः। यत् पुरस्तात्। पुरस्ताद् द्वादशाहम्। द्वादशाहमुपेयुः। द्वादशाहमिति द्वादश—अहम्। उपेयुरनाप्ताम्। उपेयुरित्युप—इयुः। अनाप्ताँव्वाचम्। वाचमुप। उपेयुः। इयुरुपदासुका। उपदासुकैषाम्। उपदासुकेत्युप—दासुका। एषाँव्वाक्। वाख् स्यात्। स्यादुपरिष्टात्। उपरिष्टाद् द्वादशाहम्। द्वादशाहमुप। द्वाद-शाहमिति द्वादश—अहम्। उप यन्ति। यन्त्याप्ताम्। आप्तामेव। एव वाचम्। वाचमुप। उप

यन्ति। यन्ति तस्मात्। तस्मादुपरिष्टात्। उपरिष्टाद् वाचा। वाचा वदामः। वदामोऽवान्तरम्। अवान्तरव्वै। अवान्तरमित्यव—अन्तरम्। ॥ [२०] ॥ वै दशरात्रेण। दशरात्रेण प्रजापतिः। दशरात्रेणेति दश—रात्रेण। प्रजापतिः प्रजाः। प्रजापतिरिति प्रजा—पतिः। प्रजा असृजत। प्रजा इति प्र—जाः। असृजत यत्। यद् दशरात्रः। दशरात्रो भवति। दशरात्र इति दश—रात्रः। भवति प्रजाः। प्रजा एव। प्रजा इति प्र—जाः। एव तत्। तद् यजमानाः। यजमानाः सृजन्ते। सृजन्त एताम्। एताꣳ ह। ह वै। वा उदङ्कः। उदङ्कः शौल्बायनः। शौल्बायनः सत्रस्य। सत्रस्यर्द्धिम्। ऋद्धिमुवाच। उवाच यत्। यद् दशरात्रः। दशरात्रो यत्। दशरात्र इति दश—रात्रः। यद् दशरात्रः। दशरात्रो भवति। दशरात्र इति दश—रात्रः। भवति सत्रस्य। सत्रस्यर्द्ध्यै। ऋद्ध्या अथो। अथो यत्। अथो इत्यथो। यदेव। एव पूर्वेषु। पूर्वेष्वहस्सु। अहस्सु विलोम। अहस्स्वित्यहः—सु। विलोम क्रियते। विलोमेति वि—लोम। क्रियते तस्य। तस्यैव। एवैषा। एषा शान्तिः। शान्तिर् द्व्यनीकाः। द्व्यनीका वै। द्व्यनीका इति द्वि—अनीकाः। वा एताः। एता रात्रयः। रात्रयो यजमानाः। यजमाना विश्वजित्। विश्वजिथ् सह। विश्वजिदिति विश्व—जित्। सहातिरात्रेण। अतिरात्रेण पूर्वाः। अतिरात्रेणेत्यति—रात्रेण। पूर्वाः षोडश। षोडश सह। सहा-तिरात्रेण। अतिरात्रेणोत्तराः। अतिरात्रेणेत्यति—रात्रेण। उत्तराः षोडश। उत्तरा इत्युत्—तराः। षोडश ये। य एवम्। एवव्विद्वाꣳसः। विद्वाꣳसस्त्रयस्त्रिꣳशदहम्। त्रयस्त्रिꣳशदहमासते। त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्—अहम्। आसत आ। ऐषाम्। एषाम् द्व्यनीका। द्व्यनीका प्रजाः। द्व्यनीकेति द्वि—अनीका। प्रजा जायते। प्रजेति प्र—जाः। जायतेऽतिरात्रौ। अतिरा-त्रावभितः। अतिरात्रावित्यति—रात्रौ। अभितो भवतः। भवतः परिगृहीत्यै। परिगृहीत्या इति परि—गृहीत्यै॥ ॥ [२१] ॥

(अहर् न्नेष्व वान्तरꣳ षोडश सह सप्तदश च) ॥ ५ ॥

---

आदित्या अकामयन्त। अकामयन्त सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमियाम। इयामेति। इति ते। ते सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् न। न प्र। प्राजानन्न्। अजानन् न। न सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्।

लोकमायन्न्। आयन् ते। त एतम्। एतꣳ षड्विꣳशद्रात्रम्। षड्विꣳशद्रात्रमपश्यन्न्। षड्विꣳ-शद्रात्रमिति षड्विꣳशत्—रात्रम्। अपश्यन् तम्। तमा। आऽहरन्न्। अहरन् तेन। तेनाय-जन्त। अयजन्त ततः। ततो वै। वै ते। ते सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् प्र। प्राजानन्न्। अजानन्थ् सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्ये। य एवम्। एवँविद्वाꣳसः। विद्वाꣳसः षड्विꣳशद्रात्रम्। षड्विꣳशद्रा-त्रमासते। षड्विꣳशद्रात्रमिति षड्विꣳशत्—रात्रम्। आसते सुवर्गम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एव लोकम्। लोकम् प्र। प्र जानन्ति। जानन्ति सुवर्गम्। सुवर्गँल्लोकम्। सुव-र्गमिति सुवः—गम्। लोकय्ँयन्ति। यन्ति ज्योतिः। ज्योतिरतिरात्रः। अतिरात्रो भवति। अति-रात्र इत्यति—रात्रः। ॥ [२२] ॥ भवति ज्योतिः। ज्योतिरिव। एव पुरस्तात्। पुरस्ताद् दधते। दधते सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्यानुख्यात्यै। अनु-ख्यात्यै षडहाः। अनुख्यात्या इत्यनु—ख्यात्यै। षडहा भवन्ति। षडहा इति षट्—अहाः। भवन्ति षट्। षड् वै। वा ऋतवः। ऋतव ऋतुषु। ऋतुष्वेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति चत्वारः। चत्वारो भवन्ति। भवन्ति चतस्रः। चतस्रो दिशः। दिशो दिख्षु। दिख्ष्वेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यसत्रम्। असत्रव्ँवै। वा एतत्। एतद् यत्। यदछन्दोमम्। अछ-न्दोमय्ँयत्। अछन्दोममित्यछन्दः—मम्। यच् छन्दोमाः। छन्दोमा भवन्ति। छन्दोमा इति छन्दः—माः। भवन्ति तेन। तेन सत्रम्। सत्रम् देवताः। देवता एव। एव पृष्ठैः। पृष्ठैरव। अव रुन्धते। रुन्धते पशून्। पशून् छन्दोमैः। छन्दोमैरोजः। छन्दोमैरिति छन्दः—मैः। ओजो वै। वै वीर्यम्। वीर्यम् पृष्ठानि। पृष्ठानि पशवः। पशवश्छन्दोमाः। छन्दोमा ओजसि। छन्दोमा इति छन्दः—माः। ओजस्येव। एव वीर्ये। ॥ [२३] ॥ वीर्ये पशुषु। पशुषु प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति षट्त्रिꣳशद्रात्रः। षट्त्रिꣳशद्रात्रो भवति। षट्त्रिꣳशद्रात्र इति षट्त्रिꣳशत्—रात्रः। भवति षट्त्रिꣳशदख्षरा। षट्त्रिꣳशदख्षरा बृहती। षट्त्रिꣳशदख्षरेति षड्विꣳशत्—अख्षरा। बृहती बार्हताः। बार्हताः पशवः। पशवो बृहत्या। बृहत्यैव। एव पशून्। पशूनव। अव रुन्धते। रुन्धते बृहती। बृहती छन्दसाम्। छन्दसाꣳ स्वाराज्यम्। स्वाराज्यमाश्ञुत। स्वारा-ज्यमिति स्व—राज्यम्। आश्ञुताश्ञुवते। अश्ञुवते स्वाराज्यम्। स्वाराज्यय्ँये। स्वाराज्यमिति

स्व—राज्यम्। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳसः षट्त्रिꣳशद्रात्रम्। षट्त्रिꣳशद्रात्रमासते। षट्त्रिꣳशद्रात्रमिति षट्त्रिꣳशत्—रात्रम्। आसते सुवर्गम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एव लोकम्। लोकय्यँन्ति। यन्त्यतिरात्रौ। अतिरात्राववभितः। अतिरात्राविवत्यति—रात्रौ। अभितो भवतः। भवतः सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्य परिगृहीत्यै। परिगृहीत्या इति परि—गृहीत्यै॥ ॥ [२४] ॥

(अतिरात्र ओजस्येव षड्विꣳशाच्च) ॥ ६ ॥

वसिष्ठो हतपुत्रः। हतपुत्रोऽकामयत। हतपुत्र इति हत—पुत्रः। अकामयत विन्देय। विन्देय प्रजाम्। प्रजामभि। प्रजामिति प्र—जाम्। अभि सौदासान्। सौदासान् भवेयम्। भवेयमिति। इति सः। स एतम्। एतमेकस्मान्नपञ्चाशम्। एकस्मान्नपञ्चाशमपश्यत्। एकस्मान्नपञ्चाशमित्येकस्मात्—नपञ्चाशम्। अपश्यत् तम्। तमा। आऽहरत्। अहरत् तेन। तेनायजत। अयजत ततः। ततो वै। वै सः। सोऽविन्दत। अविन्दत प्रजाम्। प्रजामभि। प्रजामिति प्र—जाम्। अभि सौदासान्। सौदासानभवत्। अभवद् ये। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳस एकस्मान्नपञ्चाशम्। एकस्मान्नपञ्चाशमासते। एकस्मान्नपञ्चाशमित्येकस्मात्—नपञ्चाशम्। आसते विन्दन्ते। विन्दन्ते प्रजाम्। प्रजामभि। प्रजामिति प्र—जाम्। अभि भ्रातृव्यान्। भ्रातृव्यान् भवन्ति। भवन्ति त्रयः। त्रयस्त्रिवृतः। त्रिवृतोऽग्निष्टोमाः। त्रिवृत इति त्रि—वृतः। अग्निष्टोमा भवन्ति। अग्निष्टोमा इत्यग्नि—स्तोमाः। भवन्ति वज्रस्य। वज्रस्यैव। एव मुखम्। मुखꣳ सम्। सꣳ श्यन्ति। श्यन्ति दश। दश पञ्चदशाः। पञ्चदशा भवन्ति। पञ्चदशा इति पञ्च—दशाः। भवन्ति पञ्चदशः। पञ्चदशो वज्रः। पञ्चदश इति पञ्च—दशः। वज्रो वज्रम्। ॥ [२५] ॥ वज्रमेव। एव भ्रातृव्येभ्यः। भ्रातृव्येभ्यः प्र। प्र हरन्ति। हरन्ति षोडशिमत्। षोडशिमद् दशमम्। षोडशिमदिति षोडशि—मत्। दशममहः। अहर् भवति। भवति वज्रे। वज्र एव। एव वीर्यम्। वीर्यम् दधति। दधति द्वादश। द्वादश सप्तदशाः। सप्तदशा भवन्ति। सप्तदशा इति सप्त—दशाः। भवन्त्यन्नाद्यस्य। अन्नाद्यस्यावरुद्ध्यै। अन्नाद्यस्येत्यन्न—अद्यस्य। अवरुद्ध्या अथो। अवरुद्ध्या इत्यव—रुद्ध्यै। अथो प्र। अथो इत्यथो। प्रैव। एव तैः। तैर् जायन्ते। जायन्ते पृष्ठ्यः।

पृष्ठ्यः षडहः। षडहो भवति। षडह इति षट्—अहः। भवति षट्। षड् वै। वा ऋतवः। ऋतवः षट्। षट् पृष्ठानि। पृष्ठानि पृष्ठैः। पृष्ठैरेव। एवर्तून्। ऋतूनन्वारोहन्ति। अन्वारोहन्त्यृतुभिः। अन्वारोहन्तीत्यनु—आरोहन्ति। ऋतुभिः सँव्वथ्सरम्। ऋतुभिरित्यृतु—भिः। सँव्वथ्सरम् ते। सँव्वथ्सरमिति सम्—वथ्सरम्। ते सँव्वथ्सरे। सँव्वथ्सर एव। सँव्वथ्सर इति सम्—वथ्सरे। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति द्वादश। द्वादशैकविꣳशाः। एकविꣳशा भवन्ति। एकविꣳशा इत्येक—विꣳशाः। भवन्ति प्रतिष्ठित्यै। प्रतिष्ठित्या अथो। प्रतिष्ठित्या इति प्रति—स्थित्यै। अथो रुचम्। अथो इत्यथो। रुचमेव। एवात्मन्न्। आत्मन् दधते। ॥ [२६] ॥ दधते बहवः। बहवः षोडशिनः। षोडशिनो भवन्ति। भवन्ति विजित्यै। विजित्यै षट्। विजित्या इति वि—जित्यै। षडाश्विनानि। आश्विनानि भवन्ति। भवन्ति षट्। षड् वै। वा ऋतवः। ऋतव ऋतुषु। ऋतुष्वेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यूनातिरिक्ताः। ऊनातिरिक्ता वै। ऊनातिरिक्ता इत्यून—अति-रिक्ताः। वा एताः। एता रात्रयः। रात्रय ऊनाः। ऊनास्तत्। तद् यत्। यदेकस्यै। एकस्यै न। न पञ्चाशत्। पञ्चाशदतिरिक्ताः। अतिरिक्तास्तत्। अतिरिक्ता इत्यति—रिक्ताः। तद् यत्। यद् भूयसीः। भूयसीरष्टाचत्वारिꣳशतः। अष्टाचत्वारिꣳशत ऊनात्। अष्टाचत्वारिꣳशत इत्यष्टा—चत्वारिꣳशतः। ऊनाच् च। च खलु। खलु वै। वा अतिरिक्तात्। अतिरिक्ताच् च। अतिरि-क्तादित्यति—रिक्तात्। च प्रजापतिः। प्रजापतिः प्र। प्रजापतिरिति प्रजा—पतिः। प्राजायत। अजायत ये। ये प्रजाकामाः। प्रजाकामाः पशुकामाः। प्रजाकामा इति प्रजा—कामाः। पशु-कामाः स्युः। पशुकामा इति पशु—कामाः। स्युस्ते। त एताः। एता आसीरन्न्। आसीरन् प्र। प्रैव। एव जायन्ते। जायन्ते प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिर् वैराजः। पशुभिरिति पशु—भिः। वैराजो वै। वा एषः। एष यज्ञः। यज्ञो यत्। यदेकस्मान्नपञ्चाशः। एकस्मान्नपञ्चाशो ये। एकस्मान्नपञ्चाश इत्येकस्मात्—नपञ्चाशः। य एवम्। एवँव्विद्वाꣳसः। विद्वाꣳस एकस्मान्नपञ्चाशम्। एकस्मान्नपञ्चाशमासते। एकस्मान्नपञ्चाशमित्येकस्मात्—नप-ञ्चाशम्। आसते विराजम्। विराजमेव। विराजमिति वि—राजम्। एव गच्छन्ति। गच्छन्त्य-न्नादाः। अन्नादा भवन्ति। अन्नादा इत्यन्न—अदाः। भवन्त्यतिरात्रौ। अतिरात्रावभितः। अति-

रात्रावित्यति—रात्रौ। अभितो भवतः। भवतोऽन्नाद्यस्य। अन्नाद्यस्य परिगृहीत्यै। अन्नाद्यस्येत्यन्न—अद्यस्य। परिगृहीत्या इति परि—गृहीत्यै॥ ॥ [२७] ॥

(वज्र आत्मन् प्रजया द्वाविꣳशतिश्च) ॥ ७ ॥

सँव्वथ्सराय दीक्षिष्यमाणाः। सँव्वथ्सरायेति सम्—वथ्सराय। दीक्षिष्यमाणा एकाष्टकायाम्। एकाष्टकायाम् दीक्षेरन्न्। एकाष्टकायामित्येक—अष्टकायाम्। दीक्षेरन्नेषा। एषा वै। वै सँव्वथ्सरस्य। सँव्वथ्सरस्य पत्नी। सँव्वथ्सरस्येति सम्—वथ्सरस्य। पत्नी यत्। यदेकाष्टका। एकाष्टकैतस्याम्। एकाष्टकेत्येक—अष्टका। एतस्याँव्वै। वा एषः। एष एताम्। एताꣳ रात्रिम्। रात्रिँव्वसति। वसति साक्षात्। साक्षादेव। साक्षादिति स—अक्षात्। एव सँव्वथ्सरम्। सँव्वथ्सरमारभ्य। सँव्वथ्सरमिति सम्—वथ्सरम्। आरभ्य दीक्षन्ते। आरभ्येत्या—रभ्य। दीक्षन्त आर्तम्। आर्तँव्वै। वा एते। एते सँव्वथ्सरस्य। सँव्वथ्सरस्याभि। सँव्वथ्सरस्येति सम्—वथ्सरस्य। अभि दीक्षन्ते। दीक्षन्ते ये। य एकाष्टकायाम्। एकाष्टकायाम् दीक्षन्ते। एकाष्टकायामित्येक—अष्टकायाम्। दीक्षन्तेऽन्तनामानौ। अन्तनामानावृतू। अन्तनामानावित्यन्त—नामानौ। ऋतू भवतः। ऋतू इत्यृतू। भवतो व्यस्तम्। व्यस्तँव्वै। व्यस्तमिति वि—अस्तम्। वा एते। एते सँव्वथ्सरस्य। सँव्वथ्सरस्याभि। सँव्वथ्सरस्येति सम्—वथ्सरस्य। अभि दीक्षन्ते। दीक्षन्ते ये। य एकाष्टकायाम्। एकाष्टकायाम् दीक्षन्ते। एकाष्टाकायामित्येक—अष्टकायाम्। दीक्षन्तेऽन्तनामानौ। अन्तनामानावृतू। अन्तनामानावित्यन्त—नामानौ। ऋतू भवतः। ऋतू इत्यृतू। भवतः फल्गुनीपूर्णमासे। फल्गुनीपूर्णमासे दीक्षेरन्न्। फल्गुनीपूर्णमास इति फल्गुनी—पूर्णमासे। दीक्षेरन् मुखम्। मुखँव्वै। वा एतत्। एतथ् सँव्वथ्सरस्य। ॥ [२८] ॥ सँव्वथ्सरस्य यत्। सँव्वथ्सरस्येति सम्—वथ्सरस्य। यत् फल्गुनीपूर्णमासः। फल्गुनीपूर्णमासो मुखतः। फल्गुनीपूर्णमास इति फल्गुनी—पूर्णमासः। मुखत एव। एव सँव्वथ्सरम्। सँव्वथ्सरमारभ्य। सँव्वथ्सरमिति सम्—वथ्सरम्। आरभ्य दीक्षन्ते। आरभ्येत्या—रभ्य। दीक्षन्ते तस्य। तस्यैका। एकैव। एव निर्या। निर्या यत्। निर्येति निः—या। यथ् साम्मेघ्ये। साम्मेघ्ये विषूवान्। साम्मेघ्य इति साम्—मेघ्ये। विषूवान्थ् सम्पद्यते। विषूवानिति

विषु—वान्। सम्पद्यते चित्रापूर्णमासे। सम्पद्यत इति सम्—पद्यते। चित्रापूर्णमासे दीख्षेरन्न्। चित्रापूर्णमास इति चित्रा—पूर्णमासे। दीख्षेरन् मुखम्। मुखवै। वा एतत्। एतथ् संवँथ्सरस्य। संवँथ्सरस्य यत्। संवँथ्सरस्येति सम्—वथ्सरस्य। यच् चित्रापूर्णमासः। चित्रापूर्णमासो मुखतः। चित्रापूर्णमास इति चित्रा—पूर्णमासः। मुखत एव। एव संवँथ्सरम्। संवँथ्सरमारभ्य। संवँथ्सरमिति सम्—वथ्सरम्। आरभ्य दीख्षन्ते। आरभ्येत्या—रभ्य। दीख्षन्ते तस्य। तस्य न। न का। का चन। चन निर्या। निर्या भवति। निर्येति निः—या। भवति चतुरहे। चतुरहे पुरस्तात्। चतुरह इति चतुः—अहे। पुरस्तात् पौर्णमास्यै। पौर्णमास्यै दीख्षेरन्न्। पौर्णमास्या इति पौर्ण—मास्यै। दीख्षेरन् तेषाम्। तेषामेकाष्टकायाम्। एकाष्टकायाम् क्रयः। एकाष्टकायामित्येक—अष्टकायाम्। क्रयः सम्। सम् पद्यते। पद्यते तेन। तेनैकाष्टकाम्। एकाष्टकाम् न। एकाष्टकामित्येक—अष्टकाम्। न छम्बट्। छम्बट् कुर्वन्ति। कुर्वन्ति तेषाम्। तेषाम् पूर्वपख्षे। ॥ [२९] ॥ पूर्वपख्षे सुत्या। पूर्वपख्ष इति पूर्व—पख्षे। सुत्या सम्। सम् पद्यते। पद्यते पूर्वपख्षम्। पूर्वपख्षम् मासाः। पूर्वपख्षमिति पूर्व—पख्षम्। मासा अभि। अभि सम्। सम् पद्यन्ते। पद्यन्ते ते। ते पूर्वपख्षे। पूर्वपख्ष उत्। पूर्वपख्ष इति पूर्व—पख्षे। उत् तिष्ठन्ति। तिष्ठन्ति तान्। तानुत्तिष्ठतः। उत्तिष्ठत ओषधयः। उत्तिष्ठत इत्युत्—तिष्ठतः। ओषधयो वनस्पतयः। वनस्पतयोऽनु। अनूत्। उत् तिष्ठन्ति। तिष्ठन्ति तान्। तान् कल्याणी। कल्याणी कीर्तिः। कीर्तिरनु। अनूत्। उत् तिष्ठति। तिष्ठत्यराथ्सुः। अराथ्सुरिमे। इमे यजमानाः। यजमाना इति। इति तत्। तदनु। अनु सर्वे। सर्वे राद्ध्नुवन्ति। राद्ध्नुवन्तीति राद्ध्नुवन्ति॥ ॥ [३०] ॥

(एत च्छंबट्कुर्वन्ति तेषां चतुस्त्रिंशच्च) ॥ ८ ॥

सुवर्गवै। सुवर्गमिति सुवः—गम्। वा एते। एते लोकम्। लोकय्यँन्ति। यन्ति ये। ये सत्रम्। सत्रमुपयन्ति। उपयन्त्यभि। उपयन्तीत्युप—यन्ति। अभीन्धते। इन्धत एव। एव दीख्षाभिः। दीख्षाभिरात्मानम्। आत्मानꣳ श्रपयन्ते। श्रपयन्त उपसद्भिः। उपसद्भिर् द्वाभ्याम्। उपसद्भिरित्युपसत्—भिः। द्वाभ्याँल्लोम। लोमाव। अव घ्नन्ति। घ्नन्ति द्वाभ्याम्। द्वाभ्याम् त्वचम्। त्वचम् द्वाभ्याम्। द्वाभ्यामसृत्। असृद् द्वाभ्याम्। द्वाभ्याम् माꣳसम्। माꣳसम्

द्वाभ्याम्। द्वाभ्यामस्थि। अस्थि द्वाभ्याम्। द्वाभ्याम् मज्जानम्। मज्जानमात्मदक्षिणम्। आत्मदक्षिणव्वै। आत्मदक्षिणमित्यात्म—दक्षिणम्। वै सत्रम्। सत्रमात्मानम्। आत्मानमेव। एव दक्षिणाम्। दक्षिणाम् नीत्वा। नीत्वा सुवर्गम्। सुवर्गल्लोकम्। सुवर्गमिति सुवः—गम्। लोकय्यँन्ति। यन्ति शिखाम्। शिखामनु। अनु प्र। प्र वपन्ते। वपन्त ऋद्ध्यै। ऋद्ध्या अथो। अथो रघीयाꣳसः। अथो इत्यथो। रघीयाꣳसः सुवर्गम्। सुवर्गल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमयाम। अयामेति। इतीतीति॥ ॥ [३१] ॥

(सुवर्गं पञ्चाशत्) ॥ ९ ॥

ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्त्यतिरात्रः। अतिरात्रः परमः। अतिरात्र इत्यति—रात्रः। परमो यज्ञक्रतूनाम्। यज्ञक्रतूनाम् कस्मात्। यज्ञक्रतूनामिति यज्ञ—क्रतूनाम्। कस्मात् तम्। तम् प्रथमम्। प्रथममुप। उप यन्ति। यन्तीति। इत्येतत्। एतद् वै। वा अग्निष्टोमम्। अग्निष्टोमम् प्रथमम्। अग्निष्टोममित्यग्नि—स्तोमम्। प्रथममुप। उप यन्ति। यन्त्यथ। अथोक्थ्यम्। उक्थ्यमथ। अथ षोडशिनम्। षोडशिनमथ। अथातिरात्रम्। अतिरात्रमनुपूर्वम्। अतिरात्रमित्यति—रात्रम्। अनुपूर्वमेव। अनुपूर्वमित्यनु—पूर्वम्। एवैतत्। एतद् यज्ञक्रतून्। यज्ञक्रतूनुपेत्य। यज्ञक्रतूनिति यज्ञ—क्रतून्। उपेत्य तान्। उपेत्येत्युप—इत्य। तानालभ्य। आलभ्य परिगृह्य। आलभ्येत्या—लभ्य। परिगृह्य सोमम्। परिगृह्येति परि—गृह्य। सोममेव। एवैतत्। एतत् पिबन्तः। पिबन्त आसते। आसते ज्योतिष्टोमम्। ज्योतिष्टोमम् प्रथमम्। ज्योतिष्टोममिति ज्योतिः—स्तोमम्। प्रथममुप। उप यन्ति। यन्ति ज्योतिष्टोमः। ज्योतिष्टोमो वै। ज्योतिष्टोम इति ज्योतिः—स्तोमः। वै स्तोमानाम्। स्तोमानाम् मुखम्। मुखम् मुखतः। मुखत एव। एव स्तोमान्। स्तोमान् प्र। प्र युञ्जते। युञ्जते ते। ते सङ्स्तुताः। ॥ [३२] ॥ सङ्स्तुता विराजम्। सङ्स्तुता इति सम्—स्तुताः। विराजमभि। विराजमिति वि—राजम्। अभि सम्। सम् पद्यन्ते। पद्यन्ते द्वे। द्वे च। द्वे इति द्वे। चर्चौ। ऋचावति। अति रिच्येते। रिच्येते एकया। रिच्येते इति रिच्येते। एकया गौः। गौरतिरिक्तः। अतिरिक्त एकया। अतिरिक्त इत्यति—रिक्तः। एकयाऽऽयुः। आयुरूनः। ऊनः सुवर्गः। सुवर्गो वै। सुवर्ग इति

सुवः—गः। वै लोकः। लोको ज्योतिः। ज्योतिरूर्क्। ऊर्ग् विराट्। विराट्थ् सुवर्गम्। विराडिति वि—राट्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एव तेन। तेन लोकम्। लोकय्यँन्ति। यन्ति रथन्तरम्। रथन्तरम् दिवा। रथन्तरमिति रथम्—तरम्। दिवा भवति। भवति रथन्तरम्। रथन्तरम् नक्तम्। रथन्तरमिति रथम्—तरम्। नक्तमिति। इत्याहुः। आहुर् ब्रह्मवादिनः। ब्रह्मवादिनः केन। ब्रह्मवादिन इति ब्रह्म—वादिनः। केन तत्। तदजामि। अजामीति। इति सौभरम्। सौभरम् तृतीयसवने। तृतीयसवने ब्रह्मसामम्। तृतीयसवन इति तृतीय—सवने। ब्रह्मसामम् बृहत्। ब्रह्मसाममिति ब्रह्म—सामम्। बृहत् तत्। तन् मद्ध्यतः। मद्ध्यतो दधति। दधति विधृत्यै। विधृत्यै तेन। विधृत्या इति वि—धृत्यै। तेनाजामि। अजामीत्यजामि॥ ॥ [३३] ॥

(त एकान्न पञ्चाशच्च) ॥ १० ॥

---

ज्योतिष्टोमम् प्रथमम्। ज्योतिष्टोममिति ज्योतिः—स्तोमम्। प्रथममुप। उप यन्ति। यन्त्यस्मिन्न्। अस्मिन्नेव। एव तेन। तेन लोके। लोके प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति गोष्टोमम्। गोष्टोमम् द्वितीयम्। गोष्टोममिति गो—स्तोमम्। द्वितीयमुप। उप यन्ति। यन्त्यन्तरिख्षे। अन्तरिख्ष एव। एव तेन। तेन प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यायुष्टोमम्। आयुष्टोमम् तृतीयम्। आयुष्टोममित्यायुः—स्तोमम्। तृतीयमुप। उप यन्ति। यन्त्यमुष्मिन्न्। अमुष्मिन्नेव। एव तेन। तेन लोके। लोके प्रति। प्रति तिष्ठन्ति। तिष्ठन्तीयम्। इयव्वँाव। वाव ज्योतिः। ज्योतिरन्तरिख्षम्। अन्तरिख्षम् गौः। गौरसौ। असावायुः। आयुर् यत्। यदेतान्। एतान्थ् स्तोमान्। स्तोमानुपयन्ति। उपयन्त्येषु। उपयन्तीत्युप—यन्ति। एष्वेव। एव तत्। तल्लोकेषु। लोकेषु सत्रिणः। सत्रिणः प्रतितिष्ठन्तः। प्रतितिष्ठन्तो यन्ति। प्रतितिष्ठन्त इति प्रति—तिष्ठन्तः। यन्ति ते। ते सङ्स्तुताः। सङ्स्तुता विराजम्। सङ्स्तुता इति सम्—स्तुताः। विराजमभि। विराजमिति वि—राजम्। ॥ [३४] ॥ अभि सम्। सम् पद्यन्ते। पद्यन्ते द्वे। द्वे च। द्वे इति द्वे। चर्चौ। ऋचावति। अति रिच्येते। रिच्येते एकया। रिच्येते इति रिच्येते। एकया गौः। गौरतिरिक्तः। अतिरिक्त एकया। अतिरिक्त इत्यति—रिक्तः। एकयाऽऽयुः। आयुरूनः। ऊनः सुवर्गः। सुवर्गो वै। सुवर्ग इति सुवः—गः। वै लोकः। लोको ज्योतिः। ज्योतिरूर्क्। ऊर्ग्

विराट्। विराडूर्जम्। विराडिति वि—राट्। ऊर्जमेव। एवाव। अव रुन्धते। रुन्धते ते। ते न। न ख्षुधा। ख्षुधाऽऽर्तिम्। आर्तिमा। आच्छन्ति। ऋच्छन्त्यख्षोधुकाः। अख्षोधुका भवन्ति। भवन्ति ख्षुथ्सम्बाधाः। ख्षुथ्सम्बाधा इव। ख्षुथ्सम्बाधा इति ख्षुत्—सम्बाधाः। इव हि। हि सत्रिणः। सत्रिणोऽग्निष्टोमौ। अग्निष्टोमावभितः। अग्निष्टोमावित्यग्नि—स्तोमौ। अभितः प्रधी। प्रधी तौ। प्रधी इति प्र—धी। तावुक्थ्याः। उक्थ्या मद्ध्ये। मद्ध्ये नभ्यम्। नभ्यम् तत्। तत् तत्। तदेतत्। एतत् परियत्। परियद् देवचक्रम्। परियदिति परि—यत्। देवचक्रय्ँयत्। देवचक्रमिति देव—चक्रम्। यदेतेन। एतेन षडहेन। ॥ [३५] ॥ षडहेन यन्ति। षडहेनेति षट्—अहेन। यन्ति देवचक्रम्। देवचक्रमेव। देवचक्रमिति देव—चक्रम्। एव समारोहन्ति। समारोहन्त्यरिष्ट्यै। समारोहन्तीति सम्—आरोहन्ति। अरिष्ट्यै ते। ते स्वस्ति। स्वस्ति सम्। समश्ञुवते। अश्ञुवते षडहेन। षडहेन यन्ति। षडहेनेति षट्—अहेन। यन्ति षट्। षड् वै। वा ऋतवः। ऋतव ऋतुषु। ऋतुष्वेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्युभयतोँज्योतिषा। उभयतोँज्योतिषा यन्ति। उभयतोँज्योतिषेत्युभयतः—ज्योतिषा। यन्त्युभयतः। उभयत एव। एव सुवर्गे। सुवर्गे लोके। सुवर्ग इति सुवः—गे। लोके प्रतितिष्ठन्तः। प्रतितिष्ठन्तो यन्ति। प्रतितिष्ठन्त इति प्रति—तिष्ठन्तः। यन्ति द्वौ। द्वौ षडहौ। षडहौ भवतः। षडहाविति षट्—अहौ। भवतस्तानि। तानि द्वादश। द्वादशाहानि। अहानि सम्। सम् पद्यन्ते। पद्यन्ते द्वादशः। द्वादशो वै। वै पुरुषः। पुरुषो द्वे। द्वे सक्थ्यौ। द्वे इति द्वे। सक्थ्यौ द्वौ। द्वौ बाहू। बाहू आत्मा। बाहू इति बाहू। आत्मा च। च शिरः। शिरश्च। च चत्वारि। चत्वार्यङ्गानि। अङ्गानि स्तनौ। स्तनौ द्वादशौ। द्वादशौ तत्। ॥ [३६] ॥ तत् पुरुषम्। पुरुषमनु। अनु पर्यावर्तन्ते। पर्यावर्तन्ते त्रयः। पर्यावर्तन्त इति परि—आवर्तन्ते। त्रयः षडहाः। षडहा भवन्ति। षडहा इति षट्—अहाः। भवन्ति तानि। तान्यष्टादश। अष्टादशाहानि। अष्टादशेत्यष्टा—दश। अहानि सम्। सम् पद्यन्ते। पद्यन्ते नव। नवान्यानि। अन्यानि नव। नवान्यानि। अन्यानि नव। नव वै। वै पुरुषे। पुरुषे प्राणाः। प्राणास्तत्। प्राणा इति प्र—अनाः। तत् प्राणान्। प्राणाननु। प्राणानिति प्र—अनान्। अनु पर्यावर्तन्ते। पर्यावर्तन्ते चत्वारः। पर्यावर्तन्त इति परि—आवर्तन्ते। चत्वारः षडहाः। षडहा भवन्ति। षडहा इति षट्—अहाः। भवन्ति तानि। तानि चतुर्विꣳशतिः।

चतुर्विꣳशतिरहानि। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अहानि सम्। सम् पद्यन्ते। पद्यन्ते चतुर्विꣳशतिः। चतुर्विꣳशतिरर्द्धमासाः। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अर्द्धमासाः सँव्वथ्सरः। अर्द्धमासा इत्यर्द्ध—मासाः। सँव्वथ्सरस्तत्। सँव्वथ्सर इति सम्—वथ्सरः। तथ् सँव्वथ्सरम्। सँव्वथ्सरमनु। सँव्वथ्सरमिति सम्—वथ्सरम्। अनु पर्यावर्तन्ते। पर्यावर्तन्तेऽप्र-तिष्ठितः। पर्यावर्तन्त इति परि—आवर्तन्ते। अप्रतिष्ठितः सँव्वथ्सरः। अप्रतिष्ठित इत्यप्रति—स्थितः। सँव्वथ्सर इति। सँव्वथ्सर इति सम्—वथ्सरः। इति खलु। खलु वै। वा आहुः। आहुर् वर्षीयान्। वर्षीयान् प्रतिष्ठायाः। प्रतिष्ठाया इति। प्रतिष्ठाया इति प्रति—स्थायाः। इत्येतावत्। एतावद् वै। वै सँव्वथ्सरस्य। सँव्वथ्सरस्य ब्राह्मणम्। सँव्वथ्सरस्येति सम्—वथ्सरस्य। ब्राह्मणय्ँयावत्। यावन् मासः। मासो मासिमासि। मासिमास्येव। मासिमासीति मासि—मासि। एव प्रतितिष्ठन्तः। प्रतितिष्ठन्तो यन्ति। प्रतितिष्ठन्त इति प्रति—तिष्ठन्तः। यन्तीति यन्ति॥ ॥ [३७] ॥

(विराज मेतेन द्वादशा वेतावद्वा अष्टौ च) ॥ ११ ॥

मेषस्त्वा। त्वा पचतैः। पचतैरवतु। अवतु लोहितग्रीवः। लोहितग्रीवश्छागैः। लोहित-ग्रीव इति लोहित—ग्रीवः। छागैः शल्मलिः। शल्मलिर् वृद्ध्या। वृद्ध्या पर्णः। पर्णो ब्रह्मणा। ब्रह्मणा प्लक्षः। प्लक्षो मेधेन। मेधेन न्यग्रोधः। न्यग्रोधश्चमसैः। चमसैरुदुम्बरः। उदु-म्बर ऊर्जा। ऊर्जा गायत्री। गायत्री छन्दोभिः। छन्दोभिस्त्रिवृत्। छन्दोभिरिति छन्दः—भिः। त्रिवृथ् स्तोमैः। त्रिवृदिति त्रि—वृत्। स्तोमैरवन्तीः। अवन्तीः स्थ। स्थावन्तीः। अवन्तीस्त्वा। त्वाऽवन्तु। अवन्तु प्रियम्। प्रियम् त्वा। त्वा प्रियाणाम्। प्रियाणाँव्वर्षिष्ठम्। वर्षिष्ठमा-प्यानाम्। आप्यानाम् निधीनाम्। निधीनाम् त्वा। निधीनामिति नि—धीनाम्। त्वा निधिपतिम्। निधिपतिꣳ हवामहे। निधिपतिमिति निधि—पतिम्। हवामहे वसो। वसो मम। वसो इति वसो। ममेति मम॥ ॥ [३८] ॥

(मेषः षड्विꣳशत्) ॥ १२ ॥

कूप्याभ्यः स्वाहा। स्वाहा कूल्याभ्यः। कूल्याभ्यः स्वाहा। स्वाहा विकर्याभ्यः। विकर्याभ्यः स्वाहा। विकर्याभ्य इति वि—कर्याभ्यः। स्वाहाऽवट्याभ्यः। अवट्याभ्यः स्वाहा। स्वाहा खन्याभ्यः। खन्याभ्यः स्वाहा। स्वाहा ह्रद्याभ्यः। ह्रद्याभ्यः स्वाहा। स्वाहा सूद्याभ्यः। सूद्याभ्यः स्वाहा। स्वाहा सरस्याभ्यः। सरस्याभ्यः स्वाहा। स्वाहा वैशन्तीभ्यः। वैशन्तीभ्यः स्वाहा। स्वाहा पल्वल्याभ्यः। पल्वल्याभ्यः स्वाहा। स्वाहा वर्ष्याभ्यः। वर्ष्याभ्यः स्वाहा। स्वाहाऽवर्ष्याभ्यः। अवर्ष्याभ्यः स्वाहा। स्वाहा ह्रादुनीभ्यः। ह्रादुनीभ्यः स्वाहा। ह्रादुनीभ्य इति ह्रादुनि—भ्यः। स्वाहा पृष्वाभ्यः। पृष्वाभ्यः स्वाहा। स्वाहा स्यन्दमानाभ्यः। स्यन्दमानाभ्यः स्वाहा। स्वाहा स्थावराभ्यः। स्थावराभ्यः स्वाहा। स्वाहा नादेयीभ्यः। नादेयीभ्यः स्वाहा। स्वाहा सैन्धवीभ्यः। सैन्धवीभ्यः स्वाहा। स्वाहा समुद्रियाभ्यः। समुद्रियाभ्यः स्वाहा। स्वाहा सर्वाभ्यः। सर्वाभ्यः स्वाहा। स्वाहेति स्वाहा॥ ॥ [३९] ॥

(कूप्याभ्य श्चत्वारिंशत्) ॥ १३ ॥

---

अद्भ्यः स्वाहा। अद्भ्य इत्यत्—भ्यः। स्वाहा वहन्तीभ्यः। वहन्तीभ्यः स्वाहा। स्वाहा परिवहन्तीभ्यः। परिवहन्तीभ्यः स्वाहा। परिवहन्तीभ्य इति परि—वहन्तीभ्यः। स्वाहा समन्तम्। समन्तँव्वहन्तीभ्यः। समन्तमिति सम्—अन्तम्। वहन्तीभ्यः स्वाहा। स्वाहा शीघ्रम्। शीघ्रँव्वहन्तीभ्यः। वहन्तीभ्यः स्वाहा। स्वाहा शीभम्। शीभँव्वहन्तीभ्यः। वहन्तीभ्यः स्वाहा। स्वाहोग्रम्। उग्रँव्वहन्तीभ्यः। वहन्तीभ्यः स्वाहा। स्वाहा भीमम्। भीमँव्वहन्तीभ्यः। वहन्तीभ्यः स्वाहा। स्वाहाऽम्भोभ्यः। अम्भोभ्यः स्वाहा। अम्भोभ्य इत्यम्भः—भ्यः। स्वाहा नभोभ्यः। नभोभ्यः स्वाहा। नभोभ्य इति नभः—भ्यः। स्वाहा महोभ्यः। महोभ्यः स्वाहा। महोभ्य इति महः—भ्यः। स्वाहा सर्वस्मै। सर्वस्मै स्वाहा। स्वाहेति स्वाहा॥ ॥ [४०] ॥

(अद्भ्य एकान्नत्रिंशत्) ॥ १४ ॥

---

यो अर्वन्तम्। अर्वन्तम् जिघांसति। जिघांसति तम्। तमभि। अभ्यमीति। अमीति वरुणः। वरुण इति वरुणः॥ परो मर्तः। मर्तः परः। परः श्वा। श्वेति श्वा॥ अहम् च। च

त्वम्। त्वम् च। च वृत्रहन्न्। वृत्रहन्थ् सम्। वृत्रहन्निति वृत्र—हन्न्। सम् बभूव। बभूव सनिभ्यः। सनिभ्य आ। सनिभ्य इति सनि—भ्यः। एत्या॥ अरातीवा चित्। चिदद्रिवः। अद्रिवोऽनु। अद्रिव इत्यद्रि—वः। अनु नौ। नौ शूर। शूर मꣳसतै। मꣳसतै भद्राः। भद्रा इन्द्रस्य। इन्द्रस्य रातयः। रातय इति रातयः॥ अभि क्रत्वा। क्रत्वेन्द्र। इन्द्र भूः। भूरध। अध ज्मन्न्। ज्मन् न। न ते। ते विव्यक्। विव्यङ् महिमानम्। महिमानꣳ रजाꣳसि। रजाꣳसीति रजाꣳसि॥ स्वेना हि। हि वृत्रम्। वृत्रꣳ शवसा। शवसा जघन्थ। जघन्थ न। न शत्रुः। शत्रुरन्तम्। अन्तँविविदत्। विविदद् युधा। युधा ते। त इति ते॥ ॥ [४१] ॥

(विविदद् द्वे च) ॥ १५ ॥

---

नमो राज्ञे। राज्ञे नमः। नमो वरुणाय। वरुणाय नमः। नमोऽश्वाय। अश्वाय नमः। नमः प्रजापतये। प्रजापतये नमः। प्रजापतय इति प्रजा—पतये। नमोऽधिपतये। अधिपतयेऽधि-पतिः। अधिपतय इत्यधि—पतये। अधिपतिरसि। अधिपतिरित्यधि—पतिः। अस्यधिपतिम्। अधिपतिम् मा। अधिपतिमित्यधि—पतिम्। मा कुरु। कुर्वधिपतिः। अधिपतिरहम्। अधिप-तिरित्यधि—पतिः। अहम् प्रजानाम्। प्रजानाम् भूयासम्। प्रजानामिति प्र—जानाम्। भूयासम् माम्। माम् धेहि। धेहि मयि। मयि धेहि। धेह्युपाकृताय। उपाकृताय स्वाहा। उपाकृतायेत्युप—आकृताय। स्वाहाऽऽलब्धाय। आलब्धाय स्वाहा। आलब्धायेत्या—लब्धाय। स्वाहा हुताय। हुताय स्वाहा। स्वाहेति स्वाहा॥ ॥ [४२] ॥

(नम एकान्नत्रिꣳशत्) ॥ १६ ॥

---

मयोभूर् वातः। मयोभूरिति मयः—भूः। वातो अभि। अभि वातु। वातूस्राः। उस्रा ऊर्जस्वतीः। ऊर्जस्वतीरोषधीः। ओषधीरा। आ रिशन्ताम्। रिशन्तामिति रिशन्ताम्॥ पीवस्वतीर् जीवधन्याः। जीवधन्याः पिबन्तु। जीवधन्या इति जीव—धन्याः। पिबन्त्ववसाय। अवसाय पद्वते। पद्वते रुद्र। पद्वत इति पत्—वते। रुद्र मृड। मृडेति मृड॥ याः सरूपाः। सरूपा

विरूपाः। सरूपा इति स—रूपाः। विरूपा एकरूपाः। विरूपा इति वि—रूपाः। एकरूपा यासाम्। एकरूपा इत्येक—रूपाः। यासामग्निः। अग्निरिष्ट्या। इष्ट्या नामानि। नामानि वेद। वेदेति वेद॥ या अङ्गिरसः। अङ्गिरसस्तपसा। तपसेह। इह चक्रुः। चक्रुस्ताभ्यः। ताभ्यः पर्जन्य। पर्जन्य महि। महि शर्म। शर्म यच्छ। यच्छेति यच्छ॥ या देवेषु। देवेषु तनुवम्। तनु-वमैरयन्त। ऐरयन्त यासाम्। यासाꣳ सोमः। सोमो विश्वा। विश्वा रूपाणि। रूपाणि वेद। वेदेति वेद॥ ता अस्मभ्यम्। अस्मभ्यम् पयसा। अस्मभ्यमित्यस्म—भ्यम्। पयसा पिन्वमानाः। पिन्वमानाः प्रजावतीः। प्रजावतीरिन्द्र। प्रजावतीरिति प्रजा—वतीः। इन्द्र गोष्ठे। ॥ [४३] ॥
गोष्ठे रिरीहि। गोष्ठ इति गो—स्थे। रिरीहीति रिरीहि॥ प्रजापतिर् मह्यम्। प्रजापतिरिति प्रजा—पतिः। मह्यमेताः। एता रराणः। रराणो विश्वैः। विश्वैर् देवैः। देवैः पितृभिः। पितृभिः सँव्वि-दानः। पितृभिरिति पितृ—भिः। सँव्विदान इति सम्—विदानः॥ शिवाः सतीः। सतीरुप। उप नः। नो गोष्ठम्। गोष्ठमा। गोष्ठमिति गो—स्थम्। आऽकः। अकस्तासाम्। तासाँव्वयम्। वयम् प्रजया। प्रजया सम्। प्रजयेति प्र—जया। सꣳ सदेम। सदेमेति सदेम॥ इह धृतिः। धृतिः स्वाहा। स्वाहेह। इह विधृतिः। विधृतिः स्वाहा। विधृतिरिति वि—धृतिः। स्वाहेह। इह रन्तिः। रन्तिः स्वाहा। स्वाहेह। इह रमतिः। रमतिः स्वाहा। स्वाहा महीम्। महीमु। उषु। सु सुत्रामाणम्। सुत्रामाणमिति सु—त्रामाणम्॥ ॥ [४४] ॥

(इन्द्रा ष्टात्रिꣳशच्च) ॥ १७ ॥

किꣳ स्वित्। स्विदासीत्। आसीत् पूर्वचित्तिः। पूर्वचित्तिः किम्। पूर्वचित्तिरिति पूर्व—चित्तिः। किꣳ स्वित्। स्विदासीत्। आसीद् बृहत्। बृहद् वयः। वय इति वयः॥ किꣳ स्वित्। स्विदासीत्। आसीत् पिशङ्गिला। पिशङ्गिला किम्। किꣳ स्वित्। स्विदासीत्। आसीत् पिलिप्पिला। पिलिप्पिलेति पिलिप्पिला॥ द्यौरासीत्। आसीत् पूर्वचित्तिः। पूर्वचित्तिरश्वः। पूर्वचित्तिरिति पूर्व—चित्तिः। अश्व आसीत्। आसीद् बृहत्। बृहद् वयः। वय इति वयः॥ रात्रिरासीत्। आसीत् पिशङ्गिला। पिशङ्गिलाऽविः। अविरासीत्। आसीत् पिलिप्पिला। पिलिप्पिलेति पिलिप्पिला॥ किꣳ स्वित्। स्विदेकाकी। एकाकी चरति। चरति कः। क उ। उ

स्वित्। स्विज् जायते। जायते पुनः। पुनरिति पुनः॥ किꣳ स्वित्। स्विद्धिमस्य। हिमस्य भेषजम्। भेषजम् किम्। किꣳ स्वित्। स्विदावपनम्। आवपनम् महत्। आवपनमित्या—वपनम्। महदिति महत्॥ सूर्य एकाकी। एकाकी चरति। चरति चन्द्रमाः। ॥ [४५] ॥ चन्द्रमा जायते। जायते पुनः। पुनरिति पुनः॥ अग्निर्हिमस्य। हिमस्य भेषजम्। भेषजम् भूमिः। भूमिरावपनम्। आवपनम् महत्। आवपनमित्या—वपनम्। महदिति महत्॥ पृच्छामि त्वा। त्वा परम्। परमन्तम्। अन्तम् पृथिव्याः। पृथिव्याः पृच्छामि। पृच्छामि त्वा। त्वा भुवनस्य। भुवनस्य नाभिम्। नाभिमिति नाभिम्॥ पृच्छामि त्वा। त्वा वृष्णः। वृष्णो अश्वस्य। अश्वस्य रेतः। रेतः पृच्छामि। पृच्छामि वाचः। वाचः परमम्। परमवꣳव्योम। व्योमेति वि—ओम॥ वेदिमाहुः। आहुः परम्। परमन्तम्। अन्तम् पृथिव्याः। पृथिव्या यज्ञम्। यज्ञमाहुः। आहुर् भुवनस्य। भुवनस्य नाभिम्। नाभिमिति नाभिम्॥ सोममाहुः। आहुर् वृष्णः। वृष्णो अश्वस्य। अश्वस्य रेतः। रेतो ब्रह्म। ब्रह्मैव। एव वाचः। वाचः परमम्। परमवꣳव्योम। व्योमेति वि—ओम॥ ॥ [४६] ॥

(सूर्य एकाकी चरति षट् चत्वारिꣳशच्च) ॥ १८ ॥

अम्बे अम्बालि। अम्बाल्यम्बिके। अम्बिके न। न मा। मा नयति। नयति कः। कश्चन। चनेति चन॥ ससस्त्यश्वकः। अश्वक इत्यश्वकः॥ सुभगे काम्पीलवासिनि। सुभग इति सु—भगे। काम्पीलवासिनि सुवर्गे। काम्पीलवासिनीति काम्पील—वासिनि। सुवर्गे लोके। सुवर्ग इति सुवः—गे। लोके सम्। सम् प्र। प्रोर्ण्वाथाम्। ऊर्ण्वाथामित्यूर्ण्वाथाम्॥ आऽहम्। अहमजानि। अजानि गर्भधम्। गर्भधमा। गर्भधमिति गर्भ—धम्। आ त्वम्। त्वमजासि। अजासि गर्भधम्। गर्भधमिति गर्भ—धम्॥ तौ सह। सह चतुरः। चतुरः पदः। पदः सम्। सम् प्र। प्र सारयावहै। सारयावहा इति सारयावहै॥ वृषा वाम्। वाꣳ रेतोधाः। रेतोधा रेतः। रेतोधा इति रेतः—धाः। रेतो दधातु। दधातूत्। उथ् सक्थ्योः। सक्थ्योर् गृदम्। गृदम् धेहि। धेह्यञ्जिम्। अञ्जिमुदञ्जिम्। उदञ्जिमनु। उदञ्जिमित्युत्—अञ्जिम्। अन्वज। अजेत्यज॥ य स्त्रीणाम्। स्त्रीणाम् जीवभोजनः। जीवभोजनो यः। जीवभोजन इति जीव—भोजनः। य आसाम्।

आसाम् बिलधावनः। ॥ [४७] ॥ बिलधावन इति बिल—धावनः॥ प्रियः स्त्रीणाम्। स्त्रीणामपीच्यः। अपीच्य इत्यपीच्यः॥ य आसाम्। आसाम् कृष्णे। कृष्णे लख्ष्मणि। लख्ष्मणि सर्दिगृदिम्। सर्दिगृदिम् पराऽवधीत्। परावधीदिति परा—अवधीत्॥ अम्बे अम्बालि। अम्बाल्यम्बिके। अम्बिके न। न मा। मा यभति। यभति कः। कश्चन। चनेति चन॥ ससस्त्यश्वकः। अश्वक इत्यश्वकः॥ ऊर्द्ध्वामेनाम्। एनामुत्। उच्छ्रयतात्। श्रयताद् वेणुभारम्। वेणुभारम् गिरौ। वेणुभारमिति वेणु—भारम्। गिराविव। इवेतीव॥ अथाऽस्याः। अस्या मद्ध्यम्। मद्ध्यमेधताम्। एधताꣳ शीते। शीते वाते। वाते पुनन्न्। पुनन्निव। इवेतीव॥ अम्बे अम्बालि। अम्बाल्यम्बिके। अम्बिके न। न मा। मा यभति। यभति कः। कश्चन। चनेति चन॥ ससस्त्यश्वकः। अश्वक इत्यश्वकः॥ यद्धरिणी। हरिणी यवम्। यवमत्ति। अत्ति न। न पुष्टम्। ॥ [४८] ॥ पुष्टम् पशु। पशु मन्यते। मन्यत इति मन्यते॥ शूद्रा यत्। यदर्यजारा। अर्यजारा न। अर्यजारेत्यर्य—जारा। न पोषाय। पोषाय धनायति। धनायतीति धनायति॥ अम्बे अम्बालि। अम्बाल्यम्बिके। अम्बिके न। न मा। मा यभति। यभति कः। कश्चन। चनेति चन॥ ससस्त्यश्वकः। अश्वक इत्यश्वकः॥ इयय्ँयका। यका शकुन्तिका। शकुन्तिकाऽऽहलम्। आहलमिति। आहलमित्या—हलम्। इति सर्पति। सर्पतीति सर्पति॥ आहतम् गभे। आहतमित्या—हतम्। गभे पसः। पसो नि। नि जल्गुलीति। जल्गुलीति धाणिका। धाणिकेति धाणिका॥ अम्बे अम्बालि। अम्बाल्यम्बिके। अम्बिके न। न मा। मा यभति। यभति कः। कश्चन। चनेति चन॥ ससस्त्यश्वकः। अश्वक इत्यश्वकः॥ माता च। च ते। ते पिता। पिता च। च ते। तेऽग्रम्। अग्रव्ँवृख्षस्य। वृख्षस्य रोहतः। रोहत इति रोहतः॥ ॥ [४९] ॥ प्र सुलामि। सुलामीति। इति ते। ते पिता। पिता गभे। गभे मुष्टिम्। मुष्टिमतꣳसयत्। अतꣳसयदित्यतꣳसयत्॥ दधिक्राव्णो अकारिषम्। दधिक्राव्ण इति दधि—क्राव्णः। अकारिषम् जिष्णोः। जिष्णोरश्वस्य। अश्वस्य वाजिनः। वाजिन इति वाजिनः॥ सुरभि नः। नो मुखा। मुखा करत्। करत् प्र। प्र णः। न आयूꣳषि। आयूꣳषि तारिषत्। तारिषदिति तारिषत्॥ आपो हि। हि ष्ठ। स्था मयोभुवः। मयोभुवस्ताः। मयोभुव इति मयः—भुवः। ता नः। न ऊर्जे। ऊर्जे दधातन। दधातनेति दधातन॥ महे रणाय। रणाय चख्षसे। चख्षस इति चख्षसे॥ यो वः। वः शिवतमः। शिवतमो रसः।

शिवतम इति शिव—तमः। रसस्तस्य। तस्य भाजयत। भाजयतेह। इह नः। न इति नः॥ उशतीरिव। इव मातरः। मातर इति मातरः॥ तस्मा अरम्। अरम् गमाम। गमाम वः। वो यस्य। यस्य क्षयाय। क्षयाय जिन्वथ। जिन्वथेति जिन्वथ॥ आपो जनयथ। जनयथा च। च नः। न इति नः॥ ॥ [५०] ॥

(आसा मत्ति न रोहतो जिन्वथ चत्वारि च) ॥ १९ ॥

भूर् भुवः। भुवः सुवः। सुवर् वसवः। वसवस्त्वा। त्वाऽञ्जन्तु। अञ्जन्तु गायत्रेण। गायत्रेण छन्दसा। छन्दसा रुद्राः। रुद्रास्त्वा। त्वाऽञ्जन्तु। अञ्जन्तु त्रैष्टुभेन। त्रैष्टुभेन छन्दसा। छन्द-साऽऽदित्याः। आदित्यास्त्वा। त्वाऽञ्जन्तु। अञ्जन्तु जागतेन। जागतेन छन्दसा। छन्दसा यत्। यद् वातः। वातो अपः। अपो अगमत्। अगमदिन्द्रस्य। इन्द्रस्य तनुवम्। तनुवम् प्रियाम्। प्रियामिति प्रियाम्॥ एतꣳ स्तोतः। स्तोतरेतेन। एतेन पथा। पथा पुनः। पुनरश्वम्। अश्वमा। आ वर्तयासि। वर्तयासि नः। न इति नः॥ लाजी(३)ञ्छाची(३)न्। शाचीऽ(३)न्यशः। यशो ममा(४)। मँमा(४) इँति ममा(४)॥ यँव्यायै गव्यायै। गव्याया एतत्। एतद् देवाः। देवा अन्नम्। अन्नमत्त। अत्तैतत्। एतदन्नम्। अन्नमद्धि। अद्धि प्रजापते। प्रजापत इति प्रजा—पते॥ युञ्जन्ति ब्रद्ध्नम्। ब्रद्ध्नमरुषम्। अरुषम् चरन्तम्। चरन्तम् परि। परि तस्थुषः। तस्थुष इति तस्थुषः॥ रोचन्ते रोचना। रोचना दिवि। दिवीति दिवि॥ युञ्जन्त्यस्य। अस्य काम्या। काम्या हरी। हरी विपक्षसा। हरी इति हरी। विपक्षसा रथे। विपक्षसेति वि—पक्षसा॥ रथ इति रथे॥ शोणा धृष्णू। धृष्णू नृवाहसा। धृष्णू इति धृष्णू। नृवाहसेति नृ—वाहसा॥ केतुम् कृण्वन्न्। कृण्वन्नकेतवे। अकेतवे पेशः। पेशो मर्याः। मर्या अपेशसे। अपेशस इत्यपेशसे॥ समुषद्भिः। उषद्भिरजायथाः। उषद्भिरित्युषत्—भिः। अजायथा इत्यजायथाः॥ ॥ [५१] ॥

(ब्रद्ध्नं पञ्चविꣳशतिश्च) ॥ २० ॥

प्राणाय स्वाहा। प्राणायेति प्र—अनाय। स्वाहा व्यानाय। व्यानाय स्वाहा। व्यानायेति वि—अनाय। स्वाहाऽपानाय। अपानाय स्वाहा। अपानायेत्यप—अनाय। स्वाहा स्नावभ्यः।

स्नावभ्यः स्वाहा। स्नावभ्य इति स्नाव—भ्यः। स्वाहा सन्तानेभ्यः। सन्तानेभ्यः स्वाहा। सन्तानेभ्य इति सम्—तानेभ्यः। स्वाहा परिसन्तानेभ्यः। परिसन्तानेभ्यः स्वाहा। परिसन्तानेभ्य इति परि—सन्तानेभ्यः। स्वाहा पर्वभ्यः। पर्वभ्यः स्वाहा। पर्वभ्य इति पर्व—भ्यः। स्वाहा सन्धानेभ्यः। सन्धानेभ्यः स्वाहा। सन्धानेभ्य इति सम्—धानेभ्यः। स्वाहा शरीरेभ्यः। शरीरेभ्यः स्वाहा। स्वाहा यज्ञाय। यज्ञाय स्वाहा। स्वाहा दक्षिणाभ्यः। दक्षिणाभ्यः स्वाहा। स्वाहा सुवर्गाय। सुवर्गाय स्वाहा। सुवर्गायेति सुवः—गाय। स्वाहा लोकाय। लोकाय स्वाहा। स्वाहा सर्वस्मै। सर्वस्मै स्वाहा। स्वाहेति स्वाहा॥ ॥ [५२] ॥

(प्राणाया ष्टाविꣳशतिः) ॥ २१ ॥

सिताय स्वाहा। स्वाहाऽसिताय। असिताय स्वाहा। स्वाहाऽभिहिताय। अभिहिताय स्वाहा। अभिहितायेत्यभि—हिताय। स्वाहाऽनभिहिताय। अनभिहिताय स्वाहा। अनभिहितायेत्यनभि—हिताय। स्वाहा युक्ताय। युक्ताय स्वाहा। स्वाहाऽयुक्ताय। अयुक्ताय स्वाहा। स्वाहा सुयुक्ताय। सुयुक्ताय स्वाहा। सुयुक्तायेति सु—युक्ताय। स्वाहोद्युक्ताय। उद्युक्ताय स्वाहा। उद्युक्तायेत्युत्—युक्ताय। स्वाहा विमुक्ताय। विमुक्ताय स्वाहा। विमुक्तायेति वि—मुक्ताय। स्वाहा प्रमुक्ताय। प्रमुक्ताय स्वाहा। प्रमुक्तायेति प्र—मुक्ताय। स्वाहा वञ्चते। वञ्चते स्वाहा। स्वाहा परिवञ्चते। परिवञ्चते स्वाहा। परिवञ्चत इति परि—वञ्चते। स्वाहा सँव्वञ्चते। सँव्वञ्चते स्वाहा। सँव्वञ्चत इति सम्—वञ्चते। स्वाहाऽनुवञ्चते। अनुवञ्चते स्वाहा। अनुवञ्चत इत्यनु—वञ्चते। स्वाहोद्वञ्चते। उद्वञ्चते स्वाहा। उद्वञ्चत इत्युत्—वञ्चते। स्वाहा यते। यते स्वाहा। स्वाहा धावते। धावते स्वाहा। स्वाहा तिष्ठते। तिष्ठते स्वाहा। स्वाहा सर्वस्मै। सर्वस्मै स्वाहा। स्वाहेति स्वाहा॥ ॥ [५३] ॥

(सिताया ष्टात्रिꣳशत्) ॥ २२ ॥

॥ हरिः ॐ ॥

## सप्तमकाण्डे चतुर्थः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| २२ | ५३ |

ॐ